श्रीव्यासतत्त्वज्ञतीर्थविरचित

लघुप्रभाव्याख्यावैभवम्

"विमर्श" ग्रन्थस्य प्रतिविमर्शात्मकरूपम्

ग्रन्थकर्ता

डा. नरसिंहाचार्य पुरोहितः

निवृत्तद्वैतवेदान्तविभागाध्यक्षः

राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपति.

प्रकाशनम्

श्रीगुरुसार्वभौमसंशोधनमन्दिरम्

श्रीराघवेन्द्रस्वामिमठः मन्त्रालयः २०२३




।। श्रीमन्मूलरामो विजयते ।।




।। श्रीषोडशबाहु नृसिंहदेवः ।।




॥ श्रीमन्मद्वाचार्याः



॥ श्रीजयतीर्थाः - नववृन्दावनगड्डे ॥




।। श्रीराघवेन्द्रतीर्थाः ।।



।। श्रीव्यासतत्वज्ञतीर्थाः ।।



॥ श्रीसुजयीन्द्रतीर्थाः ॥



॥ श्रीसुयतीन्द्रतीर्थाः ॥



।। श्रीसुबुधेन्द्रतीर्थाः ।।

प्रस्तुत पीठाधिपतिगळु

श्रीव्यासतत्त्वज्ञतीर्थविरचित

लघुप्रभाव्याख्यावैभवम्

("विमर्श"ग्रन्थस्य प्रतिविमर्शात्मकरूपम्)

ग्रन्थकर्ता

डा. नरसिंहाचार्य पुरोहितः

निवृत्तद्वैतवेदान्तविभागाध्यक्षः

राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपति.

प्रकाशनम्

श्रीगुरुसार्वभौमसंशोधनमन्दिरम्

श्रीराघवेन्द्रस्वामिमठः मन्त्रालयः 2023

श्रीव्यासतत्त्वज्ञतीर्थविरचित

लघुप्रभाव्याख्यावैभवम्

ग्रन्थकर्ता

डा. नरसिंहाचार्य पुरोहितः

निवृत्तद्वैतवेदान्तविभागाध्यक्षः
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपति.

५००

प्रकाशनम्

श्रीगुरुसार्वभौमसंशोधनमन्दिरम्

श्रीराघवेन्द्रस्वामिमठः मन्त्रालयः
२०२३

मुद्रणम्
श्रीगुरुराज प्रेस्, आदोनि-५१८३०१
मो. - ९४४०३३४८३२

।। श्रीमन्मूलरामो विजयते ।। ।। श्रीगुरुराजो विजयते।।

स्वस्ति श्रीविजयाभ्युदयगतशालिवाहनशके १९४५ तम
श्रीशोभनकृत्संवत्सरस्य निजश्रावणकृष्णद्वितीयायां ०१-०९-२०२३ शुक्रवासरे
श्रीमत्परमहंसपरिव्राजकाचार्यपदवाक्यप्रमाणपारावारपारंगतसर्वतंत्रस्वतंत्र-
श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्य श्रीमन्मूलरघुपतिवेदव्यासदेवदिव्यश्रीपादपद्माराधक-
जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानाधीश्वर श्रीमद्राघवेन्द्रस्वामिमठीय
वेदान्तसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वरश्रीमत्सुशमीन्द्रतीर्थकरकमलसंजातानां
श्रीमत्सुयतीन्द्रतीर्थश्रीपादवरकुमारकाणां

१००८ श्री श्रीसुबुधेन्द्रतीर्थश्रीपादानां

अनुग्रहसंदेशः

''तत्वनिर्णयपार्थोऽयं केन नाम न पूज्यते'' इति श्रीसुमध्व-विजयोक्तदिशा श्रीमदाचार्यप्रणीतोऽयं विष्णुतत्वनिर्णयग्रन्थः सर्वैरपि विद्वद्भिः विशेषतः आदृतः। ग्रंन्थस्यास्य ''श्रीटीकाकाराः''इति प्रथितयशसः अस्मत्प्राक्तनपीठाधिपतयः श्रीजयतीर्थगुरुसार्वभौमाः बहुविस्तृतां टीकां विरचय्य आबालं महदुपकारमकुर्वन् । अणुसुधेति प्रथितकीर्तेरस्याः बहवष्टिप्पण्यः दरीदृश्यन्ते । तेष्वन्यतमा '' श्रीऐजिआचार्याः'' इति प्रसिद्धानां श्रीव्यासतत्वज्ञतीर्थश्रीमच्चरणानां लघुप्रभेति नाम्नी टिप्पणी । एते च अस्मन्मठीयप्राक्तनपीठाधिपतीनां श्रीभुवनेन्द्रतीर्थश्रीमच्चरणानां विद्यातुर्याश्रमशिष्याश्च । अन्वर्थनामानः एते बहून् ग्रन्थान्विरचय्य सारस्वतप्रपञ्चं श्रीमन्तमकार्षुः। तेषु स्वतन्त्रग्रन्थाः, टिप्पणीग्रन्थाः, स्तोत्र-साहित्यानि, प्राकृतभाषया ''वासुदेवविठल'' इति अंकितनाम्ना भक्तिभावाभिवृद्धिकरगीतयः इत्येवं बहवः सन्ति । न केवलमेते विपश्चिदः, एषामन्तेवासिनश्च उत्कृष्टविद्वांसः ग्रन्थकारा अपि विद्योतन्ते । तेष्वन्यतमाः आरण्यकाचार्या इति अपरनाम्ना प्रसिद्धाः श्रीविष्णुतीर्थाः एषां विद्या-तुर्याश्रमशिष्याः । एतेषां ऐजी आचार्याणां विष्णुतत्वनिर्णय-टीकासम्बन्धिनी लघुप्रभाख्या टिप्पणी यथावस्थितटीकार्थज्ञापनपरा सती नैकटिप्पण्युक्ता-र्थविमर्शनपरा चकास्ति।

अत्र टिप्पणीनां विमर्शनं परस्परविरोधाय नैव प्रवृत्तं, किन्तु वादे वादे जायते तत्वबोधः इत्युक्तदिशा विशेषप्रतिपत्तये स्वागतार्हमिति मन्महे । तैर्विमृष्टेषु टिप्पणीष्वन्यतमा पाण्डुरङ्गी केशवभट्टारकविरचिता विषमपदवाक्यार्थविवृतिनाम्नी । लघुप्रभायां सूचितां पूर्वोक्तटिप्पणी सम्बन्धदोषालग्नकतां ज्ञापयितुं प्रसिद्धौ द्वौ विद्वांसौ विमर्श इति नामकं ग्रन्थमचीक्लृपताम्। तादृशविमर्शग्रन्थमधिकृत्य अस्मन्मठीयशिष्याः विद्वद्वराश्च तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य द्वैतवेदान्त विभागाध्यक्षचराः डा. पुरोहित नरसिंहाचार्याः विमर्शाख्यग्रन्थेऽभिहितान् विषयान् सप्रमाणं विमृश्य लघुप्रभोक्तदोषलग्नकतां पुनस्सम्पाद्य प्रतिविमर्शात्मकरूपग्रन्थं आरचयन् । ग्रन्थे चास्मिन् बहवोऽपूर्वप्रमेयाः सप्रमाणं प्रतिविमर्शिताः सन्ति । उदा-ः तृतीयभागे "सर्वत्राभावानाम भेदः सिद्धान्तविरुद्धः" इति विमर्शकारैः कृतस्याक्षेपस्योपरि "ऐक्यसाधक प्रमाणसत्वे एव परस्परमभावानां समनियतत्वेन ऐक्यमिति" सूक्ष्मतमप्रमाण निरूपणपुरस्सरं श्रीऐजीआचार्याणां लघुप्रभाव्याख्यानस्य हार्दाभिप्रायः प्रतिविमर्शात्मके ग्रन्थे समर्थितो वर्तते । एवमेवान्येषु भागेष्वपि अत्यन्त सूक्ष्मेक्षिकया प्रतिविमर्शः कृतः इति "प्रकटीकृतटीकोक्तिरिति विशेषणं श्रीव्यासतत्वज्ञतीर्थानां सम्भवत्येवेति सर्वेष्वपि भागेषु समर्थितमित्यतः नूनमभिनन्दनीयाः नरसिंहाचार्याः। अत एव "लघुप्रभाव्याख्यावैभवम्" इति सार्थकनमधेयोपेतं ग्रन्थममुं अस्मदेकादशीयचातुर्मास्यपरिसमापन शुभावसरे मुद्रापयित्वा प्रकाशनं कर्तुं मोमुद्यतेऽस्मच्चेतः। प्रतिविमर्शनामक-ग्रन्थरचयितृणां पुरोहित नरसिंहाचार्याणां सकुटुम्बानां इतोऽप्यतिशय ज्ञानभक्तिवैराग्यप्रदानद्वारा आयुरारोग्यैश्वर्यं एवमेव नैकग्रन्थरचनासामर्थ्यमपि प्रददत्विति अस्मदुपास्यं श्रीमद्राघवेन्द्रतीर्थगुर्वन्तर्गतं भारतीरमणमुख्यप्राणान्त-र्गतं श्रीमन्मूलरघुपतिवेदव्यासदेवं सम्प्रार्थयामः।

इति नारायणस्मरणानि

आमुखम्

'प्रकरणराज' इति प्रथितस्य विष्णुतत्त्वनिर्णयग्रन्थस्य टीका-टिप्पण्यादीनि बहूनि व्याख्यानानि सन्ति । मूलटीकाग्रन्थयोः व्याख्यानसन्दर्भे अभिप्रायभेदः स्यादेव । तादृशाभिप्रायभेदस्य विमर्शकरणं च न दोषावहम् । तादृग् दृष्टिकोणमधिकृत्य ऐजी आचार्याः लघुप्रभारूपव्याख्यानं विष्णुतत्त्वनिर्णयटीकाया कृतवन्तः। तत्र मूलटीकाव्याख्यानकरणानन्तरं अन्ये तु - परे तु - केचित्तु इत्यादिना अन्यान्यव्याख्याकारणां अभिप्रायभेदं तच्चिन्त्यम् तन्न - नैतच्चारु इत्यादिरूपेण विमृश्य मूलटीकापङ्क्तेः स्वारसिकार्थं प्रकटितवन्त इति विद्वद्बृन्दैः विदितचरमेवेति विज्ञापयामि। विष्णुतत्त्वनिर्णयव्याख्यानेषु श्री पाण्डुरंगी आचार्याणां व्याख्यानमपि एकं विस्तृतं व्याख्यानमस्ति । तस्मिन् व्याख्यानेऽपि ऐजी आचार्यैः बहवः विषयाः विमृष्टाः, दोषाश्चाभिहिताश्च वर्तन्ते । तेषां दोषाणां अलग्नकतां, श्रीपाण्डुरंगीआचार्याणां आर्जवं च संपादयितुं प्रवृत्ताभ्यां द्वाभ्यां तीक्ष्णमतियुताभ्यां, विद्वद्वराभ्यां श्रीवीरनारा-यणाचार्यवरखेडिश्रीनिवासाचार्याभ्यां विलसितोऽयं ग्रन्थः विमर्शनामकः विदुषां पुरतोपस्थापितश्च १९९७ मध्ये ।

षट्भागैः संवलितोऽयं ग्रन्थः। तत्रैकैकस्मिन् भागेऽपि पाण्डुरंगी आचार्यटिप्पणीस्थं ऐजी आचार्यविमृष्टं विषयमधिकृत्य अत्यन्तसरलतया, युक्त्या, प्रमाणेन च प्रस्तावं कृत्वा ततो ऐजी आचार्योक्तदोषाणामलग्नकतां महता प्रयत्नेन सम्पादयामासतुः ।

किंच श्रीसुविद्येन्द्रतीर्थश्रीमच्चरणाः पूर्वाश्रमे काले ज्ञानपिपासयैव, एतौ तीक्ष्णमतिसम्पन्नौ प्रतिभासम्पन्नौ च मम प्रियशिष्यप्रवरौ लघुविमर्शात्मक प्रबन्धलेखने प्रवृत्तौ इत्यादिना स्वप्रेमातिशयं आमुखे प्रदर्शितवन्तश्च ।

सत्यं चैतत् । नास्माकमपि विप्रतिपत्तिः । यतो हि ज्ञानप्रकाण्ड-भूतैः सकलतन्त्रेषु निष्णातैः श्री ऐजी आचार्यैः विमृष्टदोषविषये, तेषां दोषाणामलग्नताविषये च सामर्थ्यं भवितव्यमेव खलु।

यद्यपि एतादृशमहोन्नतस्य विमर्शरूपप्रबन्धस्य खण्डनं कर्तुं, पुनः दोषलग्नकतां कर्तुं वा आहोस्वित् प्रतिविमर्शं कर्तुं वा वयमसमर्थाः। तथापि मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम् इति रीत्या अपहासभाग् भवेम ।

तथात्वे भवद्भिः प्रतिविमर्शं कर्तुं यत्नः कुतो वा क्रियते इति चेत् अथापि 'चापलाय प्रचोदितः' इतिरीत्या अस्माकं प्रवृत्तिरिति विभावनीयम् । चापल्यं चात्र त्रेधा वर्तते । तत्र प्रथमं ऐजी आचार्यकृतलघुप्रभाटिप्पणी-स्थतत्तच्छास्त्रप्रतिपादितान्तिमविचारसहकृतप्रकृतटीकावाक्यव्याख्यानकरणरूपम्। द्वितीयं तु अखण्डप्रमाणप्रमितगांभीर्योपेतमूलटीकानुगुण्यपूर्वोत्तरटीकासंगत्योपेतपुनरुक्तिरहितप्रबलयुक्त्युपेतादिविशिष्टरूपेण प्रतिपादन-शैलीरूपम् ।

तृतीयं तु लघुप्रभाव्याख्यानस्थचतुस्तन्त्रगतप्रौढविषयचिन्तनमन्थनपरिपाकावस्थाविजृंभितसमाधानाभिधानरूपम् इत्यनेकानि चापल्यरूपाणि वर्तन्ते । एतादृश चापल्यानुभवेन काचन ज्ञानस्फूर्तिः संजाता । ज्ञानस्फूर्त्या च तत्त्वेशानां प्रेरणया च विमर्शग्रन्थस्य प्रतिविमर्शः करणीय इति इच्छा सञ्जाता । ततश्च यथामति यथाशक्ति तैरुक्तषट्भागेष्वपि सूक्ष्मेक्षिकया पूर्वपक्षमवबुध्य ततो प्रमाणान्वेषणं कृत्वा संप्रमाणं विषयमण्डनं कृत्वा प्रतिविमर्शरूपेणायं प्रबन्धः विदुषां पुरतः मया उपस्थापितः वर्तते।

एतत्सर्वं प्रकटीकृतटीकोक्तिरिति प्रशस्तिभाजां परमपूज्यानामैजी आचार्याणामनुग्रहः । तथा कलियुगकामधेनुकल्पवृक्षसदृशानां श्रीमद्राघवेन्द्र तीर्थानां परमानुग्रहः। एवं श्रुतिस्मृत्युक्तप्रकारेण नित्यनैमित्तिककर्मानुष्ठानरत सदाचारसच्चारित्र्यसम्पन्नविद्वज्जनवृन्दपादधूल्यनुग्रह एवेति मन्ये ।

इदमत्र सुधीभिरवधेयम्-द्वाभ्यां विद्वद्वराभ्यां तीक्ष्णमतिना दोषालग्नकता विषये महान् यत्नः विहितः वर्तते । मया तु दोषलग्नकताविषये यत्नो विहित इति आवयोः मठव्यक्तिविषयकनिन्दायां प्रवृत्तिर्नास्त्येव । प्रत्युत केवलशास्त्रविषयकविचारे एव दृष्टिरिति महतः सन्तोषस्य अवसरः ।

इतश्च मदीयप्रबन्धस्योपरि पुनः विमर्शः क्रियते चेत् तर्हि अवश्यं स्वागतं क्रियतेत्युक्त्वा विरमामि विस्तरात् ।।

इति

नरसिंहाचार्य पुरोहितः

***

कार्तज्ञ्यकुसुमाञ्जलिः

कलियुगाराध्यप्रत्यक्षदैवस्य श्रीलक्ष्मीवेङ्कटेशस्य चरणन-लिनयोः सभक्तिश्रद्धोपेतं प्रणामाञ्जलिं समर्प्य कार्तज्ञ्यकुसुमाञ्जलिं समर्पयितुमिच्छामि।

महदिदं प्रमोदस्थानं यत् श्रीहरि-वायु-गुर्वनुग्रहेण 'श्रीमद्व्या-सतत्त्वज्ञतीर्थव्याख्यानवैभवम्' इति शीर्षिकोपेतः ग्रन्थः सर्वस-ज्ञनकरकमलेषु अलङ्कृतोऽभवदिति ।

दशसंवत्सरेभ्यः प्रागेव निर्मितोऽयं ग्रन्थः। परं कारणान्तरैः मुद्रणादिकं नैवाकार्षीत् । इदानीं परमपूज्यानां श्री श्री सुबुधेन्द्रती-र्थानामनुग्रहेण प्रोत्साहदायकवचनेन, अनुग्रहसन्देशप्रदानेन च श्रीगुरुसार्वभौमसंशोधनमन्दिरेण मुद्रणं प्राप्य श्रीचरणानां करकमलाभ्यामेव श्रीमन्मन्त्रालयक्षेत्रे लोकार्पणमभवदिति महतः आनन्दस्य अवसरोऽयम्। तदर्थमहमादौ श्रीचरणानां चरणनलिनयोः साष्टाङ्गप्रणतिततिं समर्पयामि।

अध्ययनाध्यापनवाक्यार्थगोष्ठीषु च सदा निरताः, तादृशेषु च कार्येषु अस्मानपि भागग्रहीतुं प्रचोदयन्तः मम गुरवश्चाचार्याः श्रीगिरियाचार्यवर्या इति तेभ्योऽपि हार्दिकं प्रणामरूपं कार्तज्ञ्यं समर्पयामि ।

एवं मुद्रणादिकार्येषु साहाय्यमाचरितवद्भ्यः प्रियस्नेहितवर्येभ्यः श्री.एन् वादिराजाचार्येभ्यः कडप. राघवेन्द्राचार्येभ्यश्च हार्दिकं धन्यवादं वितनोमि।

अनुक्तोपालम्बदोषपरिहाराय, विदुषां छात्राणां च अवगा-हनाय विमर्शग्रन्थस्य २० पुटाः परिशिष्टभागे योजयितुं स्वीयानु-मतिं प्रदत्तवद्भ्यः विद्वद्वरेभ्यः श्रीवीरनारायणाचार्यश्रीवरखेडि श्रीनीवासाचार्यमहोदयेभ्यश्च हार्दं प्रणामरूपं कार्तज्ञ्यमाविष्करोमि ।

एवं प्रूफरीडिंगकार्ये च सहकारं कृताय मम पुत्राय आयुष्मते चि कृष्णाय च कुलस्वामि श्रीलक्ष्मीवेङ्कटेशः समनुगृह्णन्तु इत्याशासे । एवमेव डिटिपि कार्यं अत्यन्तं श्रद्धया कृतवन्तः तिरुपतिस्थ श्री प्रसादनायकमहोदयस्यापि हार्दिकं धन्यवादं समर्पयामि ।

एवं सुन्दरतया मुखपुटविन्यासमुद्रणादिकं कारयितृभ्यः ग्रन्थप्रकाशकेभ्योऽपि हार्दं धन्यवादं वितरामि ।

गच्छतःस्खलनं इतिरीत्या मुद्रणादिदोषाः भवंत्येव । ते च मदीया इति गुणाश्च मद्गुरुसम्बन्धिनः इति च भावयित्वा हंसक्षीरन्यायेन स्वीकुर्वन्तु इति सम्प्रार्थना ।

अन्ते च परोक्षतया - अपरोक्षतया च एतत्कार्ये साहाय्यं कृतवभ्द्यो सर्वेभ्योऽपि सादरं धन्यवादं समर्प्य विरमामि विस्तरात्।।

इति

विद्वज्जनपादरेण्वाश्रितः

नरसिंहाचार्य पुरोहितः

तिरुपतिः

।। श्रीकृष्णार्पणमस्तु ।।

विषयमानुक्रमणिका

***

संकेताक्षरविवरणम्

१. वि.त.नि	-	विष्णुतत्त्वनिर्णयः
२. वि.त.नि.टी	-	विष्णुतत्त्वनिर्णयटीका
३. पा.टि	-	पाण्डुरङ्गीटिप्पणी
४. रा.टि	-	राघवेन्द्रीयटिप्पणी
५. व्या.टि	-	व्यासतत्त्वज्ञीयटिप्पणी
६. ल.प्र	-	लघुप्रभा
७. स्व.नि	-	स्वर्णनिकषः
८. र.ती.टि	-	रघूत्तमतीर्थीयटिप्पणी
९. वि.	-	विमर्शः
१०. वि.त.नि.रा.टि	-	विष्णुतत्त्वनिर्णयराघवेन्द्रीयटिप्पणी
११. श्री.नि	-	श्रीनिवासतीर्थीया
१२. प्र.प	-	प्रमाणपद्धतिः
१३. त.ता.व्या	-	तर्कताण्डवव्याख्या
१४. त.द्यो	-	तत्त्वोद्योतम्
१५. द्वै.द्यु.परि	-	द्वैतद्युमणिपरिशिष्टम्
१६. का.वृ	-	काशीकावृत्तिः
१७. प.मं	-	पदमञ्जरी
१८. ब्र.सू	-	ब्रह्मसूत्रम्

***

॥श्रीः॥

॥ श्रीलक्ष्मीनरसिंहाय नमः ॥

॥ श्रीगुरुभ्यो नमः ॥

प्रथमो भागः

मङ्गलाचरणम् -

यत्पादपद्मयोर्ध्यानात् दोषाः नश्यन्ति सर्वशः ।
सुगुणाश्च समायान्ति श्रीनृसिंहं तमाश्रये ॥१॥
श्रीनिवासं समार्च्याऽथ सर्वज्ञादिगुरूनपि ।
राघवेन्द्रगुरुं वन्दे सर्वाभीष्टफलप्रदम् ॥२॥
सर्वतन्त्रस्वतन्त्रांश्च टीकामर्मप्रकाशिनः ।
कृपां मयि च कुर्वन्तु व्यासतत्त्वज्ञयोगिनः ॥ ३ ॥
तत्त्वनिर्णयग्रन्थाब्धौ शोभितो लघुकौस्तुभः ।
तत्र दर्शितभावार्थः मुनित्रयमतं हि नः ॥४॥
पाचको यत्प्रसादेन तत्क्षणज्ज्ञायते बुधः ।
गुरोःकृपाकटाक्षेण ग्रन्थोऽयं क्रियते मया ॥५॥
सुवर्णमयपात्रैश्च रामपादाब्जपूजकान् ।
सुबुधेन्द्रगुरून्वन्दे स्वर्णकङ्कणदायकान् ॥७॥

विष्णुतत्त्वनिर्णयटीका - व्याख्यानानि च

सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥

टीका (पृ.१७) विघ्नविघातादिसाधनतयाऽविगीतशिष्टाचारपरम्परादवगतं नारायणवन्दनं स्वयमन्तरायविधुरोऽपि भगवानानन्दतीर्थमुनिः शिष्यान् ग्राहयितुं प्रकरणादौ निबध्नाति इत्यादिः।

पा टी - (पृ.२३) यद्यपि ग्रन्थकृन्मते 'प्रामाणिकत्वाच्च अस्यार्थस्य' इत्युत्तरग्रन्थपर्यालोचनया, मङ्गलस्य समाप्तिफलक-

त्वव्युत्पादनपरजिज्ञासासूत्रीयसुधानुसाराच्च समाप्तेरेव मङ्गलफल-कत्वस्थित्या मङ्गलस्य विघ्नविघातादिफलकत्वाभावात् 'विघ्न-विघातादिसाधनतया' इत्युक्तिरयुक्ता इत्याभाति । तथापि विघ्न-विघातः, आदिः कारणं यस्या सा विघ्नविघातादिरिति विग्रहाश्र-यणात् विघ्नविघातादिपदेन समाप्तेरेव ग्रहणात् अदोष इति ज्ञेयम्।।

व्या.टी.- (पृ. ३०) विघ्नन्ति इति विघ्नाः = प्रतिबन्धकाः, तेषां विघातः = प्रतिहतिः । आदिना समाप्तिप्रचयादि । केचित्तु विघ्नविघातएवादिःकारणंयस्याःसमाप्तेःतत्साधनतयाइत्यर्थइत्याहुः। तदसत् । विघ्नाभावकारणत्वे, 'उत्सर्गापवादौ क्वापि न स्याताम्' इत्युत्तरटीकाविरोधात्। शब्देनैव प्रचयग्रहणसौलभ्ये उपलक्षण करणासम्भवाच्च इति ।

अत्र विमर्शः

अत्रेदं विचारणीयं तत्त्वम् । न हि तत्र पाण्डुरङ्गीय-टिप्पण्यां विघ्नाभावस्य समाप्तौ कारणत्वमुक्तम्, येन टीकाविरोधः शङ्क्येत । अपि तु प्रयोजकत्वमेव । विघ्नाभावस्य कारणत्वे एव श्रीव्यासतत्त्वज्ञतीर्थैर्वर्णितो दोषः लगति नान्यथा । तथा हि विघ्नाभावरूपः प्रतिबन्धकाभावः यदि कारणकोटौ निवेश्यते ; तदा यत्रासमाप्तं कर्म, तत्र विघ्नाभावरूपकारणाभावादेव कार्यानुत्पत्त्यु-पपत्तेः 'समाप्यते' इत्युत्सर्गः, 'विघ्नसत्त्वेन' इति अपवादश्च न घटेयाताम् । परं, मङ्गलजन्यः विघ्नध्वंसः समाप्तौ व्यापारमुद्रया प्रयोजक इत्यङ्गीक्रियते। इत्थं च नोत्सर्गापवादोच्छित्तिः । यद्यपि व्यापारत्वं जनकत्वरूपमेव, तथापि यत्र प्रतिबन्धकाभावस्य व्यापारता प्रमिता तत्र प्रयोजकत्वमेव तत् । तदपि कारणतावच्छेदक प्रतिबन्धकाभावकारण (कुलालादि) साधारणमेव यथा 'स हि धर्मः सुपर्याप्तो ब्रह्मणः परवेदने' इत्यत्र गीताभाष्यटीकायां धर्मस्य अन्तः

करणमलनाशद्वारा मोक्षसाधनताकथनावसरे प्रतिबन्धकीभूतान्तः करणमलनाशस्य द्वारत्वमुररीकृतम् । अपि च प्रतिबन्धकाभावादेः प्रयोजकत्वं तर्कताण्डवे प्रमायां दोषाभावस्य हेतुत्वभङ्गे स्वीकृतम्, कारणत्वमात्रं दूषितम् । एवम् 'अदुष्टमि-न्द्रियं तु अक्षम्' इत्यादौ ब्रह्मतर्के प्रमाणलक्षणे च दोषाभावस्य कारणत्वाभावेऽपि प्रयोजकत्वमङ्गीकृतम्। प्रयोजकेऽपि कारणश-ब्दप्रयोगः दृष्टः। दोषाभावस्य कारणत्वेऽपि (प्रयोजकत्वेऽपीत्यर्थः-ताण्डवप्रकाशः) नास्माकमनिष्टमिति च भाष्यटीकोक्तेः । एवं च प्रकृतेऽपि गुरुराजीये कारणशब्दः प्रयोजकपरः इति तस्य कारण-त्वार्थकत्वप्रयुक्तो दोषः दूरे तिष्ठति ।

अत्र प्रतिविमर्शः

यदुक्तं विघ्नाभावस्य समाप्तौ कारणत्वं, तत् प्रयोजकत्व-रूपमेव । तथा च विघ्नाभावस्य कारणत्वे एव श्रीव्यासतत्त्वज्ञतीर्थै-र्वर्णितो दोषः लगति नान्यथेति... परं मङ्गलजन्यः विघ्नध्वंसः समाप्तौ व्यापारमुद्रया प्रयोजक इत्यङ्गीक्रियते इत्थं च नोत्सर्गाप-वादोच्छित्तिः इति चेत्। तन्न घटते । कुतः ? विघ्नध्वंसस्य व्यापारत्वं नास्ति । यतो हि व्यापारः तज्जन्यत्वे सति तज्जन्यजनकः । स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य विघ्नध्वंसकारण-त्वाभावेन तज्जन्यत्वाभावात् विघ्नध्वंसस्य व्यापारमुद्रया प्रयोज-कत्वमपि नास्ति ।

अथवा श्रीव्यासतत्त्वज्ञतीर्थप्रदर्शितद्वारलक्षणं यदवच्छिन्नं यदवच्छिन्नं जनयित्वा यदवच्छिन्नं जनयति तदवच्छिन्नस्य तदवच्छिन्नजनने तदवच्छिन्नं द्वारमिति परिष्कारेऽपि मङ्गलत्वा-वच्छिन्नं विघ्नध्वंसत्वावच्छिन्नं जनयित्वा समाप्तित्वावच्छिन्नं जनयति। मङ्गलत्वावच्छिन्नस्य समाप्तित्वावच्छिन्नजनने विघ्नध्वं-

सत्वावच्छिन्नं द्वारमित्युक्तावपि अयं दोषःस्यात् । निर्विघ्नकृतौ विघ्नविघातेन विनापि समाप्तिदर्शनेन तस्य द्वारत्वं नास्ति ।

सदा वन्दे इत्यनेन मम नारायणवन्दनं न प्रत्यूहविरहादि-प्रयोजनोद्देशेनेति सूचयति इति टीकापि निर्विघ्नपुरुषानुष्ठितम-ङ्गलस्थले विघ्नध्वंस्य द्वारत्वानुपपत्तौ प्रयोजिका भवति । मङ्ग-लवादे तदेवोक्तं श्रीमद्व्यासतत्त्वज्ञतीर्थैः **किञ्च विघ्नाभावस्य समाप्तिकारणत्वे प्रतिबन्धकाभावस्य कारणत्वापत्तिः। न चेष्टापत्तिरिति वाच्यम् । प्रतिबन्धकत्वस्य कारणीभूताभावप्रतियोगित्वरूपतया प्रतिबन्धकाभावत्वेन कारणत्वेऽन्योन्याश्रयापत्तेः। किञ्च प्रतिबन्धकाभावस्य कारणत्वे उत्सर्गापवादौ क्वापि न स्याताम् । तथाहि सत्यां सामग्र्यां कार्यानुत्पादव्याप्यत्वं प्रतिबन्धकत्वम् । प्रतिबन्धकाभावस्य कारणत्वे कारणाभावादेव कार्याभावसम्भवे प्रतिबन्धकवाचो युक्तिः रिक्ता स्यात् । अतो विघ्नाभावो न प्रतिबन्धकाभावत्वेन समाप्तिकारणमिति द्वारत्वानुपपत्तिः । स्वतः सिद्धविघ्नविरहवता कृतमङ्गलस्य विघ्नध्वंसकारणत्वाभावेन तज्जन्यत्वाभावाच्च। विघ्नोत्सारणासाधारणकारणत्वअवच्छेद्यातिरिक्ताव-च्छेदकाभावेनात्माश्रयापत्तेश्च। कायिकादिविजातीयक्रियासाधार-णस्यैकस्यान्यस्य दुर्वचत्वाच्च । मङ्गलत्वस्य जातित्वे मानसत्वा-दिना साङ्कर्यापत्तेः । अतो मङ्गलस्य विघ्नध्वंसद्वारा समाप्तिः फलमिति रिक्तं वचः इति** (ल.प्र.२९) प्रतिपादितं श्रीमद्व्यासतत्त्वज्ञतीर्थैः महता प्रबन्धेन ।

एतेन **'स हि धर्मः सुपर्याप्तः ब्रह्मणः पदवेदने'** इत्यत्र गीता-भाष्यटीकायां धर्मस्य अन्तःकरणमलनाशद्वारा मोक्षसाधनकथना-वसरे प्रतिबन्धकीभूतान्तःकरणमलनाशस्य द्वारत्वमुररीकृतम् इति

निरस्तम्। यतः ज्ञानात्पूर्वानुष्ठितकर्मणः अन्तःकरणमलनाशकत्वे व्यभिचारादर्शनात् सद्धेतुत्वं सम्भवति। मङ्गलस्थले तु व्यभिचार-दर्शनात् न विघ्नध्वंसहेतुत्वं इति वैलक्षण्यात् ।

व्याख्यानान्तरेऽपि पाण्डुरंगीव्याख्याने दोषाभिधानम् -

एवमेव विष्णुतत्त्वनिर्णयव्याख्यानस्वर्णनिकषे कुम्भकोणं आनन्दतीर्थाचार्यकृते **अत्र केचित्, विघ्नविघातः आदिः=कारणं, यस्येति विग्रहे तेन पदेन समाप्तेरेवाभिधानान्न विरोध इत्याहुः । तन्न । विघ्नघातस्य समाप्त्यैव सम्बन्धनियमस्यासिध्या विघ्नविघात कारणकत्वेन समाप्तिबोधस्यासम्भवात् । राजादिना प्राप्तव्यस्य धनादेरपि विघ्नविघातजन्यत्वात् ।** (स्व.नि.११पृ) इत्यभिहितवाच्च। तत्र विघ्नाभावकारणकत्वेन समाप्तिबोधः नैव भवति । राज्ञापि प्राप्तव्यस्य घनस्य विघ्नविघातजन्यत्वेन विघ्नाभावस्य समाप्तैव सम्बन्धनियमसिद्धिः न भवतीत्यर्थः। किंच तत्रैव स्वर्णनिकषे **सुधायां मङ्गलस्य समाप्तिं प्रत्येव हेतुत्वोक्तेरित्यपि पूर्वोत्तरग्र-न्थार्थानवबोधनिबन्धनम्''।** (स्व.नि.११.) इत्यपि दोषोऽभिहितश्च।

यद्यपि अन्येषु व्याख्यानेषु विघ्नविघातद्वारा समाप्तिं प्रति हेतुत्वमुक्तम् । तथापि तत्सामान्यतः मङ्गलं - ततः विघ्ननाश ततः समाप्तिश्चेति क्रममनुसृत्योक्तमिति ज्ञातव्यम् । परमैजी आचार्यैः निर्विघ्नानुष्ठितमङ्गलस्थले विघ्नविघातद्वारा समाप्तेरभावात् विघ्नाभावस्य न प्रतिबन्धकाभावत्वेन समाप्तिकारणत्वमिति द्वारत्वानुपपत्तिः। स्वतस्सिद्धविघ्नविरहानुष्ठितमङ्गलस्थले विघ्नध्वंस-कारणत्वाभावेन तज्जन्यत्वाभावाच्चेत्युक्त्वा विघ्नध्वंसद्वारा मङ्गलस्य समाप्तिः फलमिति रिक्तं वचः इत्यभिहितम् ।।

सापेक्षत्वमात्रेण व्यापारत्वे दोषाभिधानम्

किञ्च तर्कताण्डवे निर्विकल्पकवादे **'यज्जातीयस्य यं जनयित्वैव यज्जातीयजनकत्वं स एव हि तत्र व्यापारः । अन्यथा दण्डादिरपि कुलालव्यापारः स्यात्। इति** (त.ता.१ सं ४९६ पृ) अभिहितरीत्यैव द्वारत्वं परिष्करणीयम् । नो चेत् केवलं सापेक्षत्वमात्रेण व्यापारत्वे तदा दण्डस्यापि कुलालव्यापारत्वं स्यादिति दोषोऽपि अभिहितः। तर्कताण्डवव्यख्याने च दण्डजातीयस्य चक्रभ्रमं जनयित्वैव घटजातीयजनकत्वमिति भ्रमः (भ्रमणं) **दण्डस्य व्यापारो दृष्टः इत्यर्थः। कदापि फलोपधानरहितवनस्थदण्डादेर्व्यापारवत्वाय यज्जातीयस्य इत्युक्तिः। अन्यथेति। सापेक्षत्वमात्रेण व्यापारत्वे इत्यर्थः।** (त.ता.व्या.४९६ पृ) इति । इत्थंच मङ्गलजातीयस्य निर्विघ्नानुष्ठितमङ्गलस्य नियमेन विघ्नध्वंसद्वारा समाप्तेरजनकत्वात् विघ्नध्वंसस्य द्वारत्वं नास्ति ।

विघ्नाभावस्य समाप्तौ प्रयोजकत्वेऽपि दोषाभिधानम्

यदुक्तं विमर्शकारैः **"न हि तत्र पाण्डुरङ्गीयटिप्पण्यां विघ्नाभावस्य समाप्तौ कारणत्वमुक्तम्, येन टीकाविरोधः शंक्येत। अपि तु प्रयोजकत्वमेव । विघ्नाभावकारणत्वे एव श्रीव्यासतत्त्वज्ञतीर्थैर्वर्णितो दोषः लगति नान्यथा** (वि.३ पृ) इत्यादिना विघ्नाभावस्य कारणत्वोक्तौ तदा उत्सर्गापवादन्यायभंगः, प्रतिबन्धकाभावस्य कारणत्वापत्तिः, अन्योन्याश्रयत्वं, आत्माश्रयत्वं चेत्यादयो दोषाः ऐजीआचार्योक्ताः भवेयुः । परं पाण्डुरंगी आचार्यैः विघ्नाभावस्य समाप्तौ प्रयोजकत्वमंगीक्रियते । तथाच प्रयोजकत्वांगीकारे ऐजी आचार्योक्तदोषाः न लगंति । विघ्नविघातः, आदिः कारणं यस्या सा विघ्नविघातादिः इति विग्रहे तत्रस्थकारणशब्दः प्रयोजकपरः इत्यभिधीयते। प्रयोजकेऽपि कारणशब्दप्रयोगः दृष्टः।

तथाच विघ्नाभावस्य कारणत्वार्थकत्वप्रयुक्तो दोषः दूरे तिष्ठति इति चेत् । **तन्न समीचीनम्** ।। विघ्नाभावस्य व्यापरत्वं नास्ति। स्वतः सिद्धाविघ्नविरहवता कृतस्य मंगलस्य विघ्नध्वंसकारणत्वाभावेन तज्जन्यत्वाभावाच्च विघ्नध्वंसस्य द्वारत्वं नास्ति । अतो मंगलस्य विघ्नध्वंसद्वारा समाप्तिः फलमिति रिक्तं वचः इत्यभिहितत्वेन च विघ्नाभावस्य समाप्तौ प्रयोजकत्वरूपार्थस्वीकरणं त्याज्यमेव ।

एतेन परं मंगलजन्यः विघ्नध्वंसः समाप्तौ व्यापारमुद्रया प्रयोजक इत्यंगीक्रियते इति निरस्तं वेदितव्यम् । उपर्युक्तप्रमाणगणैः विघ्नध्वंसस्य व्यापारत्वं नास्तीति प्रतिपादितत्वात् ।

एवमेव **"अपि च प्रतिबन्धकाभावादेः प्रयोजकत्वं तर्कताण्डवे प्रमायां दोषाभावस्य हेतुत्वभंगे स्वीकृतम्, कारणत्वमात्रं दूषितम् । एवम् अदुष्टमिन्द्रियंत्वक्षम् इत्यादि ब्रह्मतर्के प्रमाणलक्षणे च दोषाभावस्य कारणत्वाभावेऽपि प्रयोजकत्वमंगीकृतम्'** (वि.३ पृ) इति विमर्शकारैरभिहितं च **निरस्तप्रायमेव** । यतो हि विघ्नाभावस्य व्यापारत्वं (द्वारत्वं) नास्तीति सप्रमाणं प्रतिपादितत्वेन निर्विघ्नानुष्ठितमंगलस्थले विघ्नध्वंसद्वारा समाप्तेरजननात् विघ्नाभावस्य जनकत्वासंभवात् व्यापारत्वं न घटते इत्यतः व्यापारमुद्रया प्रयोजकः इति वक्तुं न शक्यते । तथा च कारणशब्दस्य प्रयोजकत्वरूपार्थं स्वीकृत्य ऐजीआचार्योक्तदोषस्यालग्नकतां संपाद्य पाण्डुरंगी आचार्याणामाशयवर्णनम् असमञ्जसमित्यलम्।

कारणतावच्छदेकविधया प्रयोजकत्वांगीकारे गौरवाभिधानम् ।

यदपि **'किञ्चात्र एवमपि विभाव्यते अव्यवहितपूर्वत्वसम्बन्धेन विघ्नाभावविशिष्टमङ्गलमेव कारणमित्यपि सुवचत्वेन, विघ्नाभावस्य कारणतावच्छेदकविधया प्रयोजकत्वमिति न**

काचिदनुपपत्तिरिति' (वि.३पृष्टे) ।। तदप्यसत् ।। कारणतावच्छेदक विधया प्रयोजकत्वाङ्गीकारे च गौरवात्।

एवं शब्देनैव प्रचयग्रहणसौलभ्ये उपलक्षणकरणासम्भवाच्च इति द्वितीयोऽपि दोषः सम्भवतीति ऐजीआचार्याः वदन्ति । विमर्शकारैश्च पूर्वोक्तद्वितीयदोषलग्नकत्वनिरूपणावसरे उक्तम् **विघ्नविघातः आदिः कारणं = प्रयोजकः ययोः तौ इति बहुव्रीह्या-श्रयणे 'त्यादि । तदप्यशुद्धम् ।** आदिशब्दस्य यथाश्रुतकारणत्वार्थत्वे समाप्तेरेव लाभेन प्रचयस्यालाभात् उपलक्षणकरणं युक्तमेव। तथा च ऐजीआचार्योक्तदोषः लगत्येव ।

यदपि प्रयोजकत्वार्थकत्वोक्तौ बहुव्रीहिकरणेनैव प्रचयलाभ इति तदपि चिन्त्यम् । विघ्नविघातस्य समाप्तिप्रयोजकत्वेऽपि प्रचय-प्रयोजकत्वाभावात् ।

एवमेव **"ततश्च प्रभृत्यर्थकेनादिपदेन प्रचयस्य ग्रहणसं-भवात् तदुपलक्षणापि न कार्येति"** (स्व.नि.१३पृ) स्वर्णनिकषे कुम्भकोणं आनन्दतीर्थाचार्यैरपि विमर्शितश्च।

किञ्च यदपि 'गुरुराजीये यस्याः इति एकवचनप्रयोगस्तु समुदायाभिप्रायकः' इति । तदप्यसत् ।। यस्याः इति एकवचनत्वा-र्थकत्वस्य स्वारसिकस्य त्यागेन समुदायाभिप्रायकत्वार्थकत्वकल्पना-पत्तिश्चेति कल्पनागौरवप्रसङ्गाच्च । अतः विघ्नाभावप्रयोजकत्व-रूपार्थं सन्त्यज्य विघ्नाभावकारणत्वमेव परिशेषात् अङ्गीकरणीयमित्यापतितम्। तथा च विघ्नाभावकारणत्ववादिनां श्रीपाण्डुरङ्गी आचार्याणामुपरि श्रीमद् व्यासतत्त्वज्ञतीर्थैरुक्तः 'यस्य हि स्वसामग्रीवशेन प्रसक्तिः तदौत्सर्गिकम्। सत्यामपि सामग्र्यां यद्वशात् तद्विपरीतं कार्यं भवति तत् तस्यापवादकमिति उत्सर्गापवादौ क्वापि

न स्यातां विघ्नभावकारणत्वे' इत्युत्तरटीकाविरोधः अपरिहार्य एव। तथा शब्देनैव प्रचयग्रहणसौलभ्ये उपलक्षणकरणासम्भ-वश्चेति द्वितीयदोषश्चापरिहार्य एवेति। एतत्सर्वं विमर्शनं कृत्वाऽन्ते स्वर्णनिकषे **तस्मादयुक्तं केशवाचार्यव्याख्यानम्** (स्व.नि.१२) इत्युक्तम्।।

विघ्नाभावस्य कारणत्वमभ्युपगमसिद्धान्तः इति समर्थनम्

ऐजी आचार्यैः पाण्डुरंगीटिप्पणीविमर्शकरणवेलायां विघ्ना-भावस्य समाप्तिकारणत्वे प्रतिबन्धकाभावस्य कारणत्वापत्तिरुक्ता। प्रतिबन्धकाभावस्य कारणत्वे उत्सर्गापवादन्यायभंगापत्तिस्स्यादिति दोषश्चाभिहितः। प्रकृते चान्योऽपि दोषः वर्तते इति वदामि। तथाहि -

पाण्डुरंगी आचार्यैः स्वीयव्याख्याने विघ्नाभावस्य यः समाप्ति-कारणत्वरूपार्थः प्रतिपादितो वर्तते । स च अर्थः अभ्युपगम-सिद्धान्तः न द्वैतसिद्धान्तः इति वक्तुं शक्यते। विष्णुतत्त्वनिर्णये अप्रामाण्यस्य उत्पत्तिपरतस्त्ववादे पाण्डुरंगीयव्याख्याने तत्र कारणशब्दस्य घटं प्रति कुलालपित्रादिसाधारणं यत् तद्व्यतिरेक प्रयुक्तव्यतिरेकप्रतियोगित्वरूपं प्रयोजकत्वं तन्मात्रपरत्वेन कारणत्व-परत्वाभावात् । आप्तोक्तत्वरूपगुणजन्यत्वस्येव दोषाभावजन्यत्वस्य अपौरुषेयत्वाविघातकत्वादपौरुषेयत्वसाधनस्यैव तत्र प्रस्तुतत्वात् प्रकृताभिप्रायेण **अभ्युपगमवादेन** तत्र दोषाभावस्य कारणत्वोक्तिः। (पा.टि.२३९) इत्यभिहितं वर्तते ।

तत्र दोषाभावस्य कारणत्वोक्तिरित्युक्तौ प्रकृते विघ्नाभावस्य कारणत्वोक्तिरित्यर्थस्यापि सम्पन्नत्वेन अभ्युपगमवादोऽयमिति अवश्यं ज्ञायते ।

एवमेव श्रीरघूत्तमश्रीपादैरपि विष्णुतत्त्वनिर्णयस्वीयव्याख्याने **न च दोषाभावस्य कारणत्वे च नास्माकमनिष्टम् इति भाष्यटीकाविरोधः। तस्य अभ्युपगमवादत्वात्** । (र.व्या.२३६) इति स्पष्टतया अयमभ्युपगमवादः इत्यंगीकृतं च वर्तते । तथाच दोषाभावस्य कारणत्वोक्तिः विघ्नाभावकारणत्वे पर्यवसन्नं भवतीति विघ्नाभावस्य कारणत्वोक्तिः अभ्युपगमसिद्धान्तः इति ज्ञायते ।

इत्थंच स्वारसिकस्वसिद्धान्तानुसारेण व्याख्यानम् अकृत्वा आदावेव अभ्युपगमसिद्धान्तानुसारेण व्यख्याकरणं असमञ्जसमित्यन्यो दोषः ।।

अभ्युपगमासिद्धान्तानुसरणेऽपि दोषाभिधानम् -

इदमत्रावधेयम् - विघ्नाभावप्रयोजकत्वरूपः अभ्युपगमसिद्धान्त एव भवतु। तेन सिद्धान्तानुसारेणापि उत्तरटीकाविरोधपरिहारः अस्माभिः क्रियते । अस्मत् सिद्धान्त एव सर्वत्र टीकाटिप्पण्यादिषु च अभ्युपगमसिद्धान्तानुसारेण च विरोधपरिहारः असाङ्गत्यम्, पुनरुक्तिरित्यादिदोषपरिहारः तत्र तत्र कृतो वर्तते। तथा च न क्वापि हानिः । पाण्डुरङ्गि आचार्याणां व्याख्यानं कथ-ञ्चित् सङ्गमयितुम् अस्माकं प्रयत्नः । तथा च द्वैतसिद्धान्तः एक एव । सर्वैरपि तदनुयायिभिः एकीभावेन वर्तितव्यम् । तथा च सर्वं सुस्थं भवति खल्विति काचन प्रत्याशा च वरीवर्तीति चेत्। सत्यम्। अवश्यं चैतत् । स्वीकारार्हश्चायं विचारः । 'वसुधैव कुटुम्बकम्' इत्याभाणकम् अस्मासु सदा जाग्रतो वर्तते । तत्रापि श्रीमदाचार्या-णां सिद्धान्तानुयायिनां मत्यैक्यं च सर्वदा अभीप्सितम् । अत एव श्रीमदाचार्याणामनुयायिनां सर्वेषां व्याख्यानानि ऐक्यमत्यं भजन्त इति विदितमेतत् ।

परन्तु ऐजी आचार्याणामयमाशयः - स्वसिद्धान्तानुसारेण टीकाग्रन्थस्यास्य भावं व्याख्याय ततो अभ्युपगमेन सिद्धान्तेन वा, प्रौढिवादेन वा, आहोस्वित् परमतनिराकरणव्याजेन वा, स्वसिद्धान्ताभिप्रायभेदव्याजेन वा व्याख्यानं कर्तुं शक्यते। **'व्याख्यानतो विशेषप्रतिपत्तिः'** इत्यस्य सत्वात् । परम् आदावेव पूर्वोत्तरटीकयोः विरोधभावनापरव्याख्यानकरणे अध्येतॄणाम् अवगाहनविलम्बः, लघूपस्थित्यसौकर्याद्यपायः भवेत् । तस्मादादौ व्याख्येयग्रन्थस्य पूर्वोत्तरयोर्विरोधः यथा वा न भवेत् तथा व्याख्यानं करणीय-मित्याशयः । परन्तु इदं तु महोन्नतं वैशिष्ट्यम् ऐजी आचार्याणां दृश्यते यत् समग्रटीकावाङ्मयस्योपस्थितिः सदा तेषां बुद्धौ प्रकाश-मानास्तीति। अत एव प्रतिटीकावाक्यव्याख्यानकरणवेलायां, केचित्तु - परे तु - अन्ये तु इत्यादि अस्मन्मतीयवाक्यविमर्शनकरणवेलायां च पूर्वटीकाविरोधः, वक्ष्यमाणटीकाविरोधः, इहस्थटीकावि-रोधः इत्यादिरीत्या परिनिष्ठितं व्याख्यानकरणं दृश्यते । तस्मात् पाण्डुरङ्गीकेशवभट्टारकविरचितव्याख्यानस्योपरि कृतः व्यासत-त्त्वज्ञीयविमर्शः साधुरेवेत्यलमतिविस्तरेण ।।

***

द्वितीयभागः

विष्णुतत्त्वनिर्णयटीका, तद्व्याख्यानानि च -

वेदापौरुषेयत्ववादे, पौरुषेयतावादिभिः वाक्यत्वानुमाने प्रयुक्तेऽकर्तृकत्वप्रसिद्ध्यभावरूपः उपाधिः तत्र चोदितः। तन्निरासाय, तथात्वे, प्रामाण्यमेव न स्यादिति अनुकूलतर्कं प्रदर्श्य पूर्वपक्षः दृढीकृतः । तन्निरूपणावसरे टीकायाम् -

'अनुकूलेन तर्केण सनाथे सति साधने ।

साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भवः ।।'

इति कारिका उदाहृता । (वि.नि. पृ.१५५)

पां.टी.-अनुकूलेन तर्केण हेतोः साध्यव्याप्यत्वनिर्णयेनोपाधेः साध्यव्याप्यहेत्वव्यापकतया पक्ष एव साध्यव्यापकताभङ्गः सिद्ध्यतीत्यर्थः ।

व्या.टी. - सनाथे = साध्यसाधनसमर्थे सतीत्यर्थः । तथा च पक्षे साध्यसिद्धौ तत्रैवोपाधेः साध्यव्यापकताभङ्गः । केचित्तु - 'साध्यव्याप्यहेत्वव्यापकत्वात् साध्यव्यापकताभङ्गः' इति व्याचख्युः। तन्न स्वरसम्। साध्यव्यापकोपाधिव्यभिचारात् साध्यव्यभिचारं चोदयतः तस्य साध्यव्याप्यत्वासिद्धेः । तदर्थं साध्यनिश्चया-नुसरणं तु बकबन्धरीतिमनुसरति इति ।

अत्र विमर्शः - स्वप्रयुक्ते सद्धेतौ उपाधिसन्देहे, अनुकूलतर्कं प्रयुञ्जानः वादी निरुपाधिकां व्याप्तिं निश्चित्य साध्यं साधयति । तत्रेयम् उपाधिनिरसनस्य प्रक्रिया प्रदर्श्यते - केनचित् पर्वते वह्निसाधनार्थं धूमानुमाने प्रयुक्ते, यदि प्रतिवादिना पर्वतेतरत्वादिरूपः उपाधिः अप्रयोजकता वाऽशङ्क्यते। तत्र तादृशोपाधिः प्रतिपक्षमुन्नयन्, साध्यसाधनयोः व्यभिचारं वा चोदयन् दोषो भवति । तथा च तटवर्तिपुरुषस्य हेतौ व्यभिचारसन्देहः तेनोपाधिनोद्भावितेन

फलति । तस्मिंश्च सति, लिङ्गपरामर्शप्रतिबन्धात् नानुमितिः। अत्र व्याप्तिनिश्चये प्रतिबन्धकीभूतस्य व्यभिचारज्ञानस्य अपसरणार्थं वादिना अनुकूलतर्कः व्याप्त्यंशे अनुग्राहकः 'यदि वह्निः न स्यात् तर्हि धूमोऽपि न स्यात्' इत्यादिरूपः प्रयुज्यते । तेन धूमः वह्निव्यभिचारी न भवति वह्निजन्यत्वात्' इति मननपूर्वं व्यभिचारज्ञानं दूरीक्रियते तदनन्तरं च अनुमितिर्जायते। उपाध्याहितव्यभिचारज्ञा-न निरासेन अनुमितेरप्रतिहतत्वात्। इति।।

अत्रायं गुरुराजीयाभिसन्धिः। यः प्रतिवादी उपाधावुक्ते साध्यसाधनयोः वह्निधूमाद्योः नैकत्र साहचर्यं पश्यन्नपि कार्यकारण भावमननुभूय, अनुभूयाऽपि कार्यकारणभावं विस्मृत्य वा, उपाधेरेव प्रयोजकताभ्रमेण वैय्यात्येन वा, तयोः व्यभिचारं सन्दिग्धे, तं प्रति अनुकूलतर्कबलेन व्याप्तिं निश्चाय्य व्याप्तिस्मरणं जनयित्वा वा अनुमानं प्रयोज्यम् । अत्र च अनुकूलतर्केण हेत्वधिकरणत्वावच्छेदेन साध्यनिश्चये जाते उपाध्याहितव्यभिचारज्ञानरूपप्रतिबन्धक एव निष्कास्यते; न तु उपाधिज्ञानम्। तदनिवारणे,साध्यनिर्णयस्तु असम्भवी । न च वाच्यम्, उपाधेः फलीभूतस्य व्यभिचारज्ञानस्य निवृत्तौ किं तेनेति । अथापि उपाधौ साध्यव्यापकताज्ञानस्य निराबाधात् तदानीमपि उपाधेः जागरूकत्वेन पक्षे साध्यसन्देहस्या-धानात्; आहितसन्देहस्य च दोषत्वेन सर्वसम्मतत्वात् । अत एव 'बहोः कालाद् अपेक्षितः साध्यनिर्णयः उपाध्युन्नीतव्यभिचारज्ञानेन प्रतिरुद्धः अनुकूलतर्केण तन्निवारणे सति झटिति उत्पद्यते' इति तु स्थवीयः । साध्यव्यापकस्योपाधेः पक्षेऽभावात् साध्यनिर्णयासंभवात् । प्रतिवादिनः साध्यनिर्णयापेक्षायाः एव अभावाच्च । अतः उपाध्याहितस्य सामान्यतो व्यभिचारज्ञानस्य अनुकूलतर्केण वारणेऽपि

तदानीमपि जागरूकः उपाधिः प्रथमं निरसनीयः । सः क्रमः प्रस्तूयते - उपाधौ पूर्वमेव हेत्वव्यापकत्वं निश्चितम् । तादृशहेतौ च व्यभिचारसंशयाभावेन सामान्यतः साध्यसामानाधिकरण्यरूपसाध्यव्याप्यत्वनिर्णयोऽनिर्बाधः। एवं च साध्यव्याप्यहेत्वव्यापकत्वात् उपाधिः न साध्यव्यापक इति निर्णयः शक्यसम्पादः। यत् यद् व्याप्याव्यापकं तत् तदव्यापकं यथा दण्डव्याप्यघटाव्यापकः पटः दण्डाव्यापकः इति सामान्यमुखी व्याप्तिरत्र द्रष्टव्या। ततश्च एवं रीत्या उपाधौ निरस्ते, साध्यनिर्णयः सुलभः । इति । इत्थं च, हेतौ साध्यव्याप्यत्वनिश्चयार्थं पक्षे साध्यनिर्णयः अनपेक्षित इति 'तदर्थं साध्यनिश्चयानुसरणं तु' इत्यादिना प्रतिपादितो दोषः न गुरुराजीयपक्षे आपतति । तैः पक्षे साध्यनिश्चयस्याननुसरणात्; प्रत्युत सामान्यतः हेत्वधिकरणत्वावच्छेदेन साध्यनिश्चयस्यानुसरणात्। ये पुनः अनुकूलतर्केण पक्षे साध्यनिश्चयः जायते इति मत्वा ततश्च व्याप्तिं निश्चित्य, तादृशहेत्वव्यापकत्वेन साध्यव्यापकताभङ्गमभिलषन्ति तेषामेव बकबन्धरीतिः इति श्रीव्यासतत्त्वज्ञतीर्थानामभिप्रायः ।

उपाधिनिरासात् पूर्वमेव साध्यनिश्चय इति वदतां व्यासतत्त्वज्ञतीर्थानामाकूतिस्तु इयम् - अनुकूलतर्काहितशक्तिविशेषेण साधनज्ञानेन उपाधिमुपेक्ष्यैव साध्यानुमितिरुत्पद्यते वादिपक्षीयस्य मध्यस्थस्य च तत्प्रतीक्षासद्भावात् । तदनन्तरमेव उपाधेः साध्यव्यापकता भङ्गः इति ।

परिपन्थिनः तादृशापेक्षाभावेन उपाधिनिरासात् पूर्वं नानुमितिरिति केशवाचार्याः । एवं च अधिकारिभेदेन व्यवस्थेयं युज्यते ।।

अत्र प्रतिविमर्शः -

विमर्शकारैरेव उपाधिप्रक्रियानिरूपणावसरे आरम्भे **एव 'यदि वह्निः न स्यात् तर्हि धूमोऽपि न स्यात्' इत्यादिरूपः तर्कः प्रयुज्यते । तेन धूमः वह्निव्यभिचारी न भवति वह्निजन्यत्वात् इति मननपूर्वकं व्यभिचारज्ञानं दूरीक्रियते । तदनन्तरं च अनुमितिर्जायते उपाध्याहितव्यभिचारज्ञाननिरासेन अनुमितेरप्रतिहतत्वात् ।'** (वि.५ पृष्टे) अनुकूलतर्केण व्यभिचारज्ञाननिरासेन अनुमितिः उत्पद्यत एव इत्युक्तत्वेन, तथैवानुभवस्यापि विद्यमानत्वेन च कथं तत्र भवद्भिः उपाधिनिरासात्पूर्वं 'नानुमितिरिति केशवाचार्याः' इत्युच्यते। तथा श्रीपाण्डुरङ्गि आचार्याणामाशयवर्णनावसरे पक्षे साध्यनिश्चयस्य अननुसरणात् हेत्वधिकरणावच्छेदेन साध्यनिश्चयस्यानुसरणादिति भाववर्णनं च कथं सङ्गच्छते । यतो हि हेत्वधिकरणावच्छेदेन साध्यनिश्चये जाते पक्षे साध्यनिश्चयः जात एव। तथा च सर्वैरपि अगत्या अनुमितिर्जायत इति अङ्गीकृतत्वेन अनुभवस्यापि विद्यमानत्वेन च अगत्या तैरपि (श्रीपाण्डुरङ्गि आचार्यैरपि) साध्यनिश्चयो वर्तत इत्यङ्गीकरणीयम् । वर्ततां नाम तेषां च हेत्वधिकरणावच्छेदेन साध्यनिश्चयानुसरणपक्षः । तथा च साध्यनिश्चये जाते पुनः साध्यव्याप्यत्वनिश्चयार्थं साध्यनिश्चयानुसरणं बकबन्धरीतिमनुसरतीति कृतः विमर्शः योग्य एव वर्तते ।

विकल्पमूलकतया समाधानाभिधानम् -

एतेन 'उपाधिनिरासात् पूर्वं नानुमितिरिति केशवाचार्याः' इति प्रत्युक्तम् । यतो हि अप्रयोजकशङ्काकरणानन्तरम् अनुकूलतर्केण व्यभिचारज्ञानं निरस्यते न वा? निरस्यत इत्युत्तरम्। अन्यथा अनुकूलतर्केण किं प्रयोजनम्? ततः पक्षे साध्यनिश्चयो जायते

न वा ? जायत इत्युत्तरम् । अन्यथा व्यभिचारनिरासस्य किं प्रयोजनम्? ततः साध्यव्याप्यत्वनिश्चयः हेतोः भवति न वा? भवतीत्युत्तरम् । तेषां (श्रीपाण्डुरङ्गी आचार्याणां) हेत्वधिकरणावच्छेदेन साध्यव्याप्यत्वमभिलषितं खलु इति चेत् । आस्तां तावत् अभिलषितः पक्षः। पूर्वोक्तरीत्या साध्यानुमितिरङ्गीकृता । यदि नाङ्गीक्रियते तदा अनुकूलतर्केण किं प्रयोजनम् ? व्यभिचारज्ञाननिवृत्तिः फलमिति इति चेत् व्यभिचारज्ञाननिरासेन किं भवति ? पक्षे साध्यनिश्चयः भवति। तथा चाङ्गीकृतं खलु पक्षे साध्यानुमितिरिति । तत्रापि **'अनुकूलतर्केण हेत्वधिकरणावच्छेदेन साध्यनिश्चये जाते'** (वि.५ पृष्टे) इत्यपि भवद्भिरेवोक्तत्वात् नात्राधिकतया प्रयत्नः क्रियते अस्माभिः ।

पक्षद्वयनिरूपणम् -

उपाधिनिरासात् पूर्वम् अनुकूलतर्केण पक्षे साध्यनिश्चयो भवतीति एकः पक्षः अन्यस्तु अनुकूलतर्केण व्यभिचारज्ञाननिरासेऽपि उपाधिः जागरूकः भवति । तस्य निरासाय हेत्वधिकरणावच्छेदेन साध्यनिश्चयो आवश्यकः तदर्थं 'यत् यद् व्याप्याव्यापकं तत् तदव्यापकम् यथा दण्डव्याप्यघटाव्यापकः पटः दण्डाव्यापकः इति सामान्यमुखीव्याप्तिमङ्गीकृत्य उपाधौ निरस्ते सति साध्यनिर्णय इति अन्यः द्वितीयः पक्षः वर्तते । तथा चास्माकं पुरतः पक्षद्वयमस्ति । उभाभ्यामपि पक्षाभ्यां साध्यनिर्णयः जायत एव । भवतां तु द्वितीयः पक्षः । 'अनुकूलतर्केण उपाध्याहितव्यभिचारज्ञाननिरासेन अनुमितेरप्रतिहतत्वादिति भवद्भिरेवाङ्गीकृतत्वेन' 'नानुमितिरिति केशवाचार्याः' इति कथमुक्तं भवद्भिः?। प्रथमपक्षे साध्यनिर्णयः अनुकूलतर्केण व्यभिचारनिरासद्वारा भवतीति सर्वैरपि अङ्गीकरणीयमेव खलु। तथा चादौ व्यभिचारज्ञानं, ततः उपाधिः,

ततः परामर्शप्रतिबन्धः, ततः नानुमितिरिति। एवम् अनुकूलतर्कः, ततः व्यभिचारनिरासः, ततः उपाधिनिरासः, ततश्च परामर्शोत्पत्तिः, ततो अनुमितिरिति क्रमः अनुसन्धेयः । इत्थं च **"उपाधेरपि साध्यव्यापकताभङ्गः सिद्ध्यति"** (वि.नि.टी. १५५) इति टीकापङ्क्तेः व्याख्यानकरणवेलायां सर्वैः व्याख्याकारैः अनुकूलतर्केण साध्यसाधनसमर्थे सति, पक्षे साध्यसिद्धौ तत्रैवोपाधेः साध्यव्यापकताभङ्गः इत्यर्थपरतया आद्यः पक्षः स्वीकृतः । परं श्रीपाण्डुरङ्गी आचार्यैः द्वितीयः पक्षः 'अनुकूलेन तर्केण हेतोः साध्यव्याप्यत्वनिर्णयेनोपाधेः साध्यव्याप्यहेत्वव्यापकतया पक्ष एव साध्यव्यापकताभङ्गः सिद्ध्यतीत्यर्थपरतया' स्वीकृतः ।

पाण्डुरङ्गीयव्याख्याने गौरवप्रदर्शनम् -

द्वितीयपक्षाश्रयणे उपस्थितिकृतगौरवं च भवति । अनुकूलतर्केण व्यभिचारज्ञाननिवृत्तौ साध्यनिश्चयः भवतीति उपस्थितिकृतलाघवस्य विद्यमानत्वात् पूर्वपक्षत्वेनाभिमतकारिकायां

अनुकूलेन तर्केण सनाथे सति साधने ।
साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भवः।।

इति। तथैव स्वारसिकार्थस्य स्वीकरणात्, अस्मन्मतीयव्याख्यानेष्वपि आद्यपक्षस्यैव स्वीकाराच्च लाघवमस्ति । तथाहि- श्रीमद्राघवेन्द्रतीर्थैः **'यथोक्तमिति ।। साध्यव्यापकताभङ्गात् पक्ष इति ।। अनुकूलतर्कसनाथसाधनेन पक्षे साध्यनिश्चये सति तत्रैवोपाधेः साध्यव्यापकत्वाभावादिति भावः'** (वि.त.नि.टी.रा.१५७ पृ) प्रतिपादितं दृश्यते ।

एवमेव वंशपल्लीटिप्पण्यामपि - **मउपाधेरिति ।। अनुकूलतर्केण पक्षीभूते वेदे सकर्तृत्वस्यैव सिद्धत्वेनाकर्तृकत्वप्रसिद्ध्य**

भावरूपोपाधेः पक्ष एव व्यभिचारात् साध्यव्यापकताभङ्गः सिद्ध्यतीत्यर्थः' (श्री.टि.१५८पृ) इति च प्रतिपादितं दरीदृश्यते ।

इत्थंच 'वेदः सकर्तृकः वाक्यत्वात्' इत्यत्र पूर्वपक्षानुमाने अकर्तृकत्वप्रसिद्ध्यभावः उपाधिरुक्तः। वाक्यत्वाधिकरणे अपौरुषेये अकर्तृकत्वप्रसिद्ध्यभावः नास्तीति साधनाव्यापकत्वं वर्तते । उपाधिः जागरूकः वर्तत इति उपाधिः प्रथमं नीरसनीयः इत्यपि न सम्यक् । उपाधौ पूर्वमेव हेत्वव्यापकत्वं निश्चितम् । तादृशहेतौ च व्यभिचारसंशयाभावेन सामान्यतः साध्यव्याप्यत्वनिर्णयः अनिर्बाधः इत्युक्तत्वात् उपधिरपि निरस्त इत्येव गम्यते । अन्यथा अनुकूलतर्के सत्यपि सोपाधिकहेतौ व्याप्तिनिश्चय एव न स्यात्। साध्यव्यापकत्वभंगार्थं पुनः सामान्यमुखीव्याप्त्यंगीकरणं तेन चोपाधिनिरासः इत्यभिधानं व्यर्थमापद्येत । यतो हि टीकाकारैरेव उपाधेरपि साध्यव्यापकताभंगः सिध्यतीत्युक्तम् । तट्टीकानुसारेण च सर्वैः व्याख्याकारैः तथैव व्याख्या कृता च वर्तते। इत्थं च उपाधौ हेत्वव्यापकत्वं यथा निश्चितं तथैव साध्यव्यापकत्वभंगोऽपि निश्चितः इत्येवांगीकरणीयः । नो चेत् अत्रापि बकबन्धरीतिः वर्तते इत्यवश्यमंगीकरणीयं स्यादिति दोषः आपद्येत ।।

प्रकृते श्रीपाण्डुरङ्गीआचार्यकृतव्याख्यानोपरि बकबन्धरीत्यनुसरणरूपः विमर्शः ऐजीआचार्यैः कृतः । बकबन्धरीतिस्तु एवं वर्तते । बको नाम पक्षिविशेषः। सः कथं ग्राह्यः? इति केनचित् पृष्टे अन्यो वदति। 'क्वचिदुपविष्टस्य बकस्य शिरसि नवनीते निक्षिप्ते सति आतपेन द्रवीभूतेन चक्षुरन्तःप्रविष्टेन तेन चक्षुषोः निमीलने सति बको बन्धनीयः' इति । इयं बकबन्धरीतिः । नवनीतस्थापनकाल एव बकबन्धनसम्भवे तदुक्तरीतिर्यथा प्रयासः तथाऽयमपीत्यर्थः।

अनुकूलतर्केण पक्षे साध्यनिश्चये सति पुनः उपाधिव्यापकताभङ्गेन उपाधेः निवृत्या पुनः उपाधिनिवृत्यर्थं प्रयासः बकबन्धरीतिः इति।

यदुक्तं विमर्शकारैः अत्रानुकूलतर्केण हेत्वधिकरणत्वावच्छेदेन साध्यनिश्चये जाते उपाध्याहितव्याभिचारज्ञानरूपप्रतिबन्धक एव निष्कास्यते न तु उपाधिज्ञानम् । तदनिवारणे साध्यनिर्णयस्तु असम्भवी इति ।। **न एतच्चारु** ।। उपाध्याहितव्यभिचार ज्ञानरूपप्रतिबन्धकनिरासे उपाधिज्ञानमपि अकिंचित्क-रमेवेति ज्ञातव्यम् । नो चेत् कथमनुमितिः तत्रोत्पद्येत ? कथं चानुकूलतर्केण व्यभिचारज्ञानं दूरीक्रियेत ?

इदमत्रावधेयम् - पर्वतो वह्निमान् धूमादित्यत्र हेतुरस्तु साध्यं मास्तु इत्यप्रयोजकशंकायां वा कृतायां तत्र तादृशोपाधिः प्रतिपक्षमुन्नयन् वा साध्यसाधनयोः व्याभिचारं वा उन्नयन् दोषो भवति । ततश्च लिङ्गपरामर्शप्रतिबन्धात् अनुमितिः न जायते । तादृशव्यभिचारज्ञानवारणाय यदि वह्निः न स्यात् तर्हि धूमोऽपि न स्यात् इति तर्कः प्रयुज्यते । तेन च व्यभिचारज्ञानं दूरीक्रियते । ततश्चानुमितिर्जायत इति प्रमितोऽयं विचारः ।

अत्रैवमभिसंधिः - तर्कनिवर्त्यशंका द्वेधा वर्तते। तत्र प्रथमा पक्षतदितरसाधारण्येन सधूमोऽपि कश्चित् निरग्निकः अस्त्विति । द्वितीयशंका च परामर्शोत्पत्यनन्तरं प्रतिप्रमाणोपलम्बेन धूमवानपि पर्वतो निरग्निकः किं न स्यादिति बाधसत्प्रतिपक्षशंका । तत्र यद्यपि द्वितीयापि शङ्का फलतो व्यभिचारशङ्का एव। हेतुमति साध्याभावशङ्कायां साध्याभाववति हेतुसत्वरूपव्यभिचारस्य फलितत्वात् उभयोरपि शङ्कयोः अभेदः वर्तते । तदुक्तं तर्कताण्डवन्यायदीपे श्रीमद्राघवेन्द्रतीर्थैः **फलत इति ।। हेतुमति साध्याभावशङ्कायां साध्याभाववति हेतुसत्वरूपव्यभिचारस्य**

फलितत्वादित्यर्थः इति (त.ता.न्या.दी.) । अथापि प्रथमपक्षे स्वारसिकव्यभिचारत्वं, द्वितीयपक्षे आधेयत्वमर्थात् बलात् व्युत्पाद्य व्यभिचारत्वमिति भेदः। एवं च द्विविधापि शङ्का तर्केणैव निरस्यते। निवर्त्यभेदेन निवर्तकोऽपि द्वेधा वर्तते । तदेवोक्तं **द्विविधापि शङ्का तर्केण निरस्यते** इति (त.ता.) । तत्राद्योऽनुमितिकारणनिष्पादकः । द्वितीयस्तु वह्न्यनुमितिरूपकेवलप्रमाणनिष्पादनरूप इति ।। तथा चायमुभयविधोऽप्यनुग्रहः तर्कसाध्योऽत्र विवक्षितः। तस्मात् स्वयं प्रमाणभूत एव तर्कः प्रमाणानामनुग्राहकोऽपि भवतीति सिद्धान्तः। तदेवोक्तं प्रमाणपद्धतौ **सोऽयं क्वचित् विपरीतशङ्कानिरसनद्वारेण प्रमाणान्तरानुग्राहकोऽपि भवति** (प्र.प.)

अङ्गपंचकसम्पन्नतर्केण व्यभिचारज्ञानस्य दूरीकरणम् -

एतादृशस्तर्कः अङ्गपंचकसम्पन्नः वर्तते । तथाहि -

१. आपादकस्यापाद्येन व्याप्तिः।

२. प्रतितर्केणाप्रतिघातः।

३. आपाद्यस्यानिष्टत्वम् ।

४. आपाद्यस्य विपर्यये पर्यवसानम्।

५. परस्य अननुकूलत्वमिति ।

इत्यंगपंचकसम्पन्नस्तर्कः बलिष्ठः व्याभिचारशंकां दूरीकरोति इति अभिधानेन उपाधिः जागरूकः वर्तते इत्यादिवचनं रिक्तमेव । तथा च उपाध्याहितव्यभिचारज्ञानस्य प्रतिबन्धकस्य निरासे उपाधिज्ञानमपि निरस्तमेवेति बोध्यम् । एतत्सर्वमेकीकृ-त्योक्तं टीकायां -

अनुकूलेन तर्केण सनाथे सति साधने ।

साध्यव्यापकताभंगात् पक्षे नोपाधिसम्भवः।। इति शम् ।।

***

तृतीयभागः

श्रीमद्विष्णुतत्त्वनिर्णयः, टीका, तद्व्याख्यानानि च -

मूलम् (वि.नि.पृ.२३२) 'विमतं सकर्तृकं कार्यत्वाद् घटवत्' इत्युक्ते 'विमतं विकर्तृकमस्मत्सम्मतकर्तृरहितत्वाद् आत्मवत्' इत्यनुमानविरोधात् ।

टीका 'ननु अस्मत्सम्मतकर्तृरहितत्वात् इत्यत्र अस्मत्सम्मतत्वं, कर्तृरहितत्वस्य वा विशेषणं कर्तुर्वा। नाद्यः, व्यर्थत्वात्। तत्त्यागे साध्याविशिष्टत्वात्' इति प्रथमकल्पं दूषयित्वा द्वितीयेऽपि शरीरादिमान् कर्ताऽनेनोच्यते इति पक्षे- 'किं शरीरादिरहितः कर्ता अङ्गीक्रियते न वा। आद्ये तत्कृते व्यभिचारः। द्वितीये पुनः वैय्यर्थ्यं, साध्याविशिष्टता च । न च सामान्यविशेषभावेन भेदः। शरीरादिरहितस्य कर्तुरनङ्गीकारे सामान्यस्यानुपपत्तेः' इति टीकायां वाक्यसन्दर्भः ।

पां. टि.- साध्याविशिष्टता चेति ।। 'तत्त्यागे' इति शेषः

व्या.टि.-साध्याविशिष्टतेति ।। अभावयोः समनैय्यत्येन ऐक्यात् धूमाभाववान् प्रमेयधूमाभावादित्यत्रेव साध्यावैशिष्ट्यमिति ध्येयम् ।

विशेषणत्यागे साध्यावैशिष्ट्यमिति व्याख्यानं चिन्त्यम् । 'न च सामान्ये' इत्युत्तरग्रन्थासङ्गतेः ।।

अत्र विमर्शः -

अत्रायं पाण्डुरङ्गी आचार्याणां भावः । पूर्वं कर्तृराहित्ये अस्मत् सम्मतत्वविशेषणमिति कल्पे प्रथमं वैय्यर्थ्यम्, अनन्तरं च तत्त्यागे साध्याविशिष्टता इति दोषोद्भावनक्रमोऽनुसृतः टीकाकारैः। तदनुरोधेनैव अत्रापि प्रकृते शरीरादिमत्त्वविशेषणे कर्तरि दत्ते,

यदि त्यज्यते, तर्हि साध्यसाधनयोः वैशिष्ट्यमेव न भवति । इति । तदर्थमेवात्र ' चे 'ति शब्दः व्यवस्थितविकल्पप्रत्यायकः बोध्यः । एतादृशार्थकत्वं तत्वोद्योतटीकायां भेदानुमाननिरूपणावसरे भेदस्य साध्यमानस्य, सकलप्रतियोगिकत्वपक्षे 'पूर्ववदंशे बाधात् । अप्रसिद्धविशेषणत्वाच्च' इत्यत्र सर्वैः व्याख्याकारैः वर्णितम् (त.ते पृ.१३१)

अथ विशेषणत्यागे 'न च सामान्यविशेषभावेन भेद इत्युत्तरग्रन्थासङ्गतिरिति चेत् तत्र वदामः । तथाहि कर्तरि शरीरादिमत्त्वविशेषणं व्यर्थमिति प्रथममुक्तम् । वैय्यर्थ्यभिया यदि त्यज्यते, तर्हि साध्यसाधनयोरविशेषः । यदि पुनः विशेषणं सामान्यविशेषभावसम्पादनार्थं, तेन च भेदः इति सार्थक्यमुपपाद्यते, तदाऽपि शरीरादिमत् कर्तुरनङ्गीकारेण साध्यसाधनयोर्मध्ये 'इदं सामान्यम्' 'अयं विशेषः' इति भेदः न युज्यत एवेति ग्रन्थार्थः इति न कश्चित् क्षुद्रोपद्रवः इति ।

किञ्चात्र उभयोः समनैय्यत्येनैक्यमङ्गीकृत्य विशेषणसत्त्वपक्ष एव साध्यावैशिष्ट्यमिति यदुक्तं, तत्तु पूर्वग्रन्थविरोधि इति भासते । कथमन्यथा, पूर्वमपि कर्तृराहित्ये अस्मत्सम्मतत्त्वविशेषणपक्ष एव 'तत्त्यागे अभावयोः समनैयत्येनैक्यमाश्रित्य साध्यवैशिष्ट्य कथनसम्भवे, तत्त्यागे साध्याविशिष्टता' इत्युक्तिः? तथा च तत्र तत्त्यागे एव साध्यावैशिष्ट्यकथनेनेदं ज्ञायते यत् सर्वथा विशेषणसत्त्वे, विशिष्टप्रतियोगिकत्वे वाऽभावयोः न समनैयत्येन ऐक्यं वाच्यमिति । एतेन अभावे व्यावर्तकविशेषणसत्त्वे, प्रतियोगिनि वा व्यावर्तकविशेषणसत्वे एव अभावयोर्भेदः, न त्वन्यथा इत्यपि प्रत्युक्तम्। पूज्या अस्मद्गुरुचरणास्तु 'पूर्वं कर्तृराहित्ये अस्मत्सम्मतत्वविशेषणकल्पे तत्त्यागे साध्यावैशिष्ट्योक्तेः तत्र

उपपत्त्यन्तरं प्रकल्प्य प्रकृते तावत् अभावयोः समनियतयोः लाघवेनैक्यमेव स्वीकृत्य श्रीव्यासतत्त्वज्ञतीर्थानां पक्षः उपपादनीयः' इति समादधते ।

परं सिद्धान्ते एकाकारव्यवहारसिद्धानां तत्तदत्यन्ताभावनामेकत्वे लाघवमिति तत्र तु ऐक्यम् उररीकृतम्। अथाऽपि तदन्यत्र केवलान्वयिनामनेकेषां शशविषाणनरविषाणाद्यभावानां नैव अभेदः स्वीकृतः। तथात्वे पर्यायतापत्त्या मम शिरसि विषाणं नास्तीत्यादौ नरविषाणाभावादेरेव प्रतीत्यापत्त्याद्यनेकदोष प्रसङ्गात्। किञ्च अप्रामाणिकप्रतियोगिकात्यन्ताभाववादिमते सर्वेषाम भावानाम् ऐक्येन, एक एवात्यन्ताभावः स्यात्। न च इष्टापत्तिः व्यवहारवैविध्यविलोपापत्तेरिति । प्रामाणिकप्रतियोगिकात्यन्ताभावमतेऽपि पूर्वोक्तरीत्या केवलान्वयिनामभावानामभेदापत्त्या दोषो दुरुद्धर एव । अतः सर्वथा सर्वत्राभावानामभेदः सिद्धान्तविरुद्ध इति कथं तद्व्याख्यासङ्गमनम् ?

अतः टीकाविरोधादिपरिहाराय अभावानामैक्यमिति पक्षे परित्यक्ते, अनन्यगत्या तत्त्यागे इति शेषपूरणमेव वरमिति भाति ।।

अत्र प्रतिविमर्शः -

'विमतं सकर्तृकं कार्यत्वात् घटवत्' इत्युक्ते 'विमतं विकर्तृकम् अस्मत्सम्मतकर्तृरहितत्वात् आत्मवत्' इत्यनुमानविरोधात् इत्यत्र विरोधानुमानघटकसाध्यहेत्वोः अर्थात् विकर्तृकत्वास्मत्सम्मतकर्तृरहितत्वयोः साध्याविशिष्टता (साध्यहेत्वोरैक्यं) उक्ता ।

अत्र द्वितीयपक्षे अस्मत्सम्मतत्वं नाम शरीरादिमत्वम्। तच्च कर्तरि विशेषणम्। एवं च शरीरादिमान् यः कर्ता, तद्रहितत्वात्

इति हेतुः भवति। अत्र टीकाकारैः विकल्पद्वयं कृत्वा द्वितीयकल्पे वैय्यर्थ्यम्। साध्यहेत्वोरैक्यं चापादिता । एतद् दोषद्वयं विशेषण-सत्वपक्षे एवेति ऐजीआचार्याणां मतम् ।

पाण्डुरंगीआचार्याणां पुनः विशेषणसत्वे वैय्यर्थ्यं दोषः। तदभावे साध्याविशिष्टता इति व्यवस्थितविकल्पमनुसृत्य तत्त्या-गेति शेषपूरणेन टीकावाक्यं व्याख्यातम् । तदयुक्तम् । उत्तरग्रन्था-सांगत्यात् । तथाहि -

पाण्डुरंगीयव्याख्याने उत्तरग्रन्थासांगत्यप्रदर्शनम् -

यदि तत्त्यागे इति शेषपूरणं स्यात् तर्हि **'न च सामान्यविशेष भावेन भेदः'** (वि.नि.टी.३२३ पृ) इति उत्तरटीकाविरोधः भवति। यतो हि अस्मत्सम्मतविशेषणसत्वे एव 'इदं सामान्यम्' 'अयं च विशेषः' इति अर्थात् अस्मत्सम्मतत्वविशेषणविशिष्टकर्तृरहितत्वं विशेषः, केवलकर्तृरहितत्वं साध्यं तु सामान्यम् इति ज्ञातुं शक्यते । अन्यथा नेति विशेषणत्यागपक्षे उत्तरटीका असाङ्गत्यं दुर्वारं भवति । अथापि एतद् दोषपरिहाराय विमर्शकारैः यद्विमर्शितम् - 'यदि पुनः विशेषणं सामान्यविशेषभावसम्पादनार्थं, तेन च भेदः इति सार्थक्यमुपपाद्यते, तदपि शरीरादिमत्कर्तुरनङ्गीकारेण साध्यसाधनयोर्मध्ये **'इदं सामान्यम् - 'अयं विशेषः' इति भेदः न युज्यत एवेति ग्रन्थार्थः इति न कश्चित् क्षुद्रोपद्रवः'** इति (वि.८ पृ)। **तदप्यसमञ्जसमेव** । यतो हि टीकाकारैरेव **'शरीरादिरहितस्य कर्तुरनङ्गीकारे सामान्यस्यानुपपत्तेः'** इत्युक्तम्(वि.नि.टी.३२३ पृ)। तत्र 'विकर्तृकम्' इत्यस्य शरीरादिमत्कर्तृरहितमित्यर्थः। हेतुस्तु शरीरादिमत्कर्तृराहित्यमिति। तथा च हेतुसाध्ययोरैक्यात् सामान्यस्याप्यनुपपत्तेरित्युक्तम्। तदेवोक्तं श्रीमद्राघवेन्द्रतीर्थैरपि 'सामान्यस्यानुपपत्तेरिति ।। **विकर्तृकम् इत्यस्य शरीराशरीरादिमत् कर्तृरहितमित्यस्येत्यर्थः । हेतुरप्ययमेवेति प्राप्तत्वादिति भावः।'** इति । (वि.नि.टी.रा.टि.३२४ पृ)

यदि तु सामान्यविशेषभावमभ्युपेयते तदापि न दोषः। व्याप्त्यभावादित्युत्तरम् । यतो हि सामान्याभावस्य विशेषाभावेन साधनं नास्ति। तथाहि - नीलघटाभावेन घटसामान्याभावो वक्तुं न शक्यते । अथवा नीलघटवति देशे नात्र घटो नीलघटाभावात् इत्यादौ व्यभिचारात् । अनेनापि ज्ञायते हेतुः शरीरादिमत्कर्तृ राहित्यमात्रमिति शरीरादिमत्त्वविशेषणविशिष्टतया व्याख्यातत्वात् विशेषणत्यागे साध्याविशिष्टता इति अभिप्रायः नास्ति इति स्फुटम् अवगतुं शक्यते । अतः विशेषणत्यागे साध्याविशिष्टता इति व्याख्यानं नैव समीचीनमिति ज्ञायते । तस्मात् समनियता-भावानाम् ऐक्यमिति दृष्ट्या साध्याविशिष्टताभिधानमिति व्यासतत्त्वज्ञतीर्थीयव्याख्यानं मन्त्रालयश्रीपरिमळाचार्याणामपि सम्मतमित्यवगम्यते । अर्थात् एतादृशरीत्या व्याख्यानं व्यासतत्त्वज्ञीयविमर्शस्य पुष्टिहेतुर्भवति ।

विशेषणसत्वपक्षे एव साध्याविशिष्टतादोषाभिधानम्

किञ्च यदुक्तं विमर्शकारैः **सिद्धान्ते एकाकारव्यवहारसिद्धा-नां तत्तदत्यन्ताभावानामेकत्वे लाघवमि'ति तत्र तु ऐक्यम् उररीकृतम् । अथापि तदन्यत्र केवलान्वयिनामनेकेषां शशविषा-णनरविषाणाद्यभावानां नैव अभेदः स्वीकृतः । तथात्वे पर्यायता-पत्त्या 'मम शिरसि विषाणं नास्ति' इत्यादौ नरविषाणाभावादेरेव प्रतीत्यापत्त्याद्यनेकदोषप्रसङ्गात् । किञ्च अप्रामाणिकप्रतियोगि-कात्यन्ताभाववादिमते सर्वेषामभावानाम् ऐक्येन, एक एवात्यन्ताभावः स्यात्। न चेष्टापत्तिः। व्यवहारवैविध्यविलोपाप-त्तेरिति प्रामाणिकप्रतियोगिकात्यन्ताभावमतेऽपि पूर्वोक्तरीत्या केवलान्वयिनामभावानाम् अभेदापत्त्या दोषो दुरुद्धर एव । अतः**

सर्वथा सर्वत्राभावानामभेदः सिद्धान्तविरुद्ध इति कथं तद्व्याख्या सङ्गमनम् ? इति (विमर्शः९ पृ.) । **एतदप्यसत्** ।। सर्वत्राभावानां लाघवादभेदः इति यद्युच्येत तदैव सिद्धान्तविरोधः समायाति। अत्र समनियतानां सर्वेषाम् अभावानां लाघवमात्रेण नैक्यमुच्यते श्रीव्यासतत्त्वज्ञतीर्थैः, येन सिद्धान्तविरोधः, सर्वेषां प्रामाणिका प्रामाणिकप्रतियोगिकानाम् अत्यन्ताभावानामेकत्वं वा, पर्यायत्वं वा इत्यादयो दोषाः स्युः। परमस्मिन् विषये द्वैतसिद्धान्तानुसारेण तैः व्याख्यानं कृतमिति निरूपयितुं प्रभवामि। किं तत् सिद्धान्तरहस्यम् अस्मिन् विषये इति चेदित्थम् 'ऐक्यसाधकप्रमाणसत्व एव परस्परं समनियताभावानामैक्यं वर्तते । यत्र तु ऐक्यसाधकप्रमाणं नास्ति तत्र परस्परं समनियताभावानां लाघवमात्रेण ऐक्यं नास्ति' इति । एतदुपष्टम्भकतया उदाहरणमपि प्रदर्शितं ऐजिआचार्यैः। धूमाभाववान् प्रमेयधूमाभावात् इत्यत्र धूमाभावप्रमेयधूमाभावयोः धूमरूपैकप्रतियोगिकत्वरूपप्रमाणस्य सत्वेन तयोः अभावयोः समनियतत्वेन ऐक्यमुररीकृतम्। अस्तु पूर्वोक्तसिद्धान्तः अङ्गीक्रियते । भवतु च तादृशाभावानामेवैक्यम्।किंप्रकृते?इतिचेत्प्रकृतमनुसरामः।'विमतं विकर्तृकम् अस्मत्सम्मतकर्तृरहितत्वात्' इत्यत्र कर्तृप्रतियो-गिकत्वास्मत्सम्मतकर्तृप्रतियोगिकत्वयोः कर्तृसामान्याभावास्मत्सम्मतकर्तृभावयोर्द्वयोरपि कर्तृरूपैकप्रतियोगिकत्वसद्भावात् । यतः अस्मत्सम्मतकर्ता नाम सशरीरकर्ता इत्यर्थः। अशरीरकर्तृ अभावेन सशरीरकर्ता कर्ता च एकैव । एवं च प्रतियोगिनोरैक्यात् अभावयोरपि समनियतत्वेनैक्यमुररीकृतम् । तथात्वे एव हेतुसाध्ययोर-विशिष्टता सञ्जातेति साध्याविशिष्टतादोषोद्भावनं कृतं श्रीमट्टीकाकृत्पादैरिति व्यासतत्त्वज्ञीयव्याख्यानं विशेषणसत्वपक्ष एवेति कृतं वर्तते।

अत एव विशेषणत्यागेति श्रीपाण्डुरङ्गी आचार्याणां यः पक्षः सः असमीचीन इति कृतः व्यासतत्त्वज्ञीयविमर्शः साधुरेवेति मन्तव्यः।

समनियताभावानामैक्ये प्रमाणाभिधानम् -

अस्तु तावदयं नियमः 'ऐक्यसाधकप्रमाणसत्वे परस्परम् अभावानां समनियतत्वेन ऐक्यमिति।' परं द्वैतसिद्धान्तचतुष्कोणान्तः-स्थित अयं नियमः इति प्रदर्शनीयम् अथवा अयं नियमः अस्ति इत्यस्मिन् विषये श्रीमदाचार्यकृतसर्वमूलेषु अथवा सर्वमूलटीकासु वा, आहोस्वित् टिप्पण्यादिषु वा, आहोस्वित् स्वतन्त्रग्रन्थेषु, वादग्रन्थेषु प्रमाणवाक्यं प्रदर्शनीयम् । तदानीमेव अङ्गीका-रार्हश्च भवति । नो चेत् श्रीमद् व्यासतत्त्वज्ञतीर्थैः कल्पितोऽयं सिद्धान्तः कथमाश्वासयोग्यः ? इति काचनशङ्काऽपि समुन्मिषति इति चेत् , मास्तु उद्वेगशङ्का । अस्त्यत्र प्रमाणम्। श्रीमद्व्यासतत्त्वज्ञ तीर्थप्रदर्शितनियमं स्वीकृत्य द्वैतद्युमणिकारैः 'द्वैतद्युमणिपरिशिष्टे' समाहितं वर्तते। तथाहि - **तत्र अथ सर्वेषामत्यन्ताभावानां केवलान्वयितया समनियतत्वेनैक्यापत्तिः। निर्दोषत्वादेः भगवल्लक्षणत्वानुपपत्तिः। जीवादावतिव्याप्तेः। घटाधिकरणेऽपि भूतले घटो नास्ति इति वाक्यस्य प्रामाण्यं च स्यात् । घटवति भूतले घटाभावो नास्ति इति वाक्यं प्रमाणं च न स्यात् । सत्वासत्वयोः परस्परविरहात्मकत्वाद् युक्तिरपि न सङ्गच्छेत इति चेन्न। "समनियतत्वेऽप्यैक्यसाधकप्रमाणं विना लाघवमात्रेण ऐक्यसिद्धेरयोगात्। अन्यथाऽभिधेयत्वज्ञेयत्वादीनां पञ्चाशद्वर्णाव्याकृताकाशादीनां देशकालसमनियतानामप्यैक्यं स्यात् "** इति (द्वै.द्यु. परि. ३५ पृ) भगवन्निर्दोषत्वलक्षणप्रतिपादनसन्दर्भे प्रतिपादितं दृश्यते । तथा चायं नियमः सदृष्टान्तः अभिहितो वर्तते

द्वैतद्युमणिपरिशिष्टे। तत्र पूर्वोक्तनियमानङ्गीकारे दोषोऽप्यभिहितः। एवं च तत्र महताप्रयत्नेन भगवन्निर्दोषत्वलणं समर्थितं दरीदृश्यते ।

एतेन विमर्शकारैः यदुक्तम् अतः सर्वथा सर्वत्राभावानामभेदः सिद्धान्तविरुद्ध इति कथं तद्व्याख्या सङ्गमनम (वि.९ पृ) इत्यादि तन्निरस्तं वेदितव्यम् । सप्रमाणं सिद्धान्तस्य प्रतिपादितत्वात्, श्रीमद्व्यासतत्त्वज्ञीयव्याख्यासङ्गमनस्य कृतत्वात्, एतादृशरीत्या अभिप्रायकत्वेन च व्याख्यानकर्तॄणां स्वातन्त्र्यस्य विद्यमानत्वात्, टीकवाक्यानां सम्मतिसूचकत्वेन च सर्वं निर्दुष्टमिति न कश्चित् दोषः।

टीकावाक्यवत् व्यासतत्वज्ञीयवाक्यमपि अखण्डितम् -

एवं रीत्या विशेषणत्यागपक्षे उत्तरटीका असांगत्यादिकं प्रदर्श्य विशेषणसत्त्वपक्षे एव सर्वसांगत्यदिकं च निरूप्य एतदुपष्टम्भकतया पूर्वोत्तरटीकावाक्यगागम्भीर्यमाहात्म्यं च सुष्ठु अस्मिन्सन्दर्भे प्रकटितमिति प्रकटीकृतटीकोक्तिः इति प्रशस्तिभाजनानां श्रीमद्व्यासतत्वज्ञतीर्थानां लघुप्रभाव्याख्यानमधिकृत्य विमर्शकारैः । ''अतः सर्वथा सर्वत्राभावानामभेदः सिद्धान्तविरुद्धः इति कथं तद्व्याख्या संगमनं'' ? इत्याद्युक्तं निरस्तं तत् ।

एतेन पूज्याः अस्मदुगुरुचरणास्तु इत्यादिना उपपत्यन्तरं प्रकल्प्य व्यासतत्त्वज्ञतीर्थानां पक्षः उपपदनीय इति तदपि अनावश्यकम् । यतो हि प्रसक्तानुमानघटकसाध्यहेत्वोरभावरूपत्वेन, तयोरविशेषदोषस्याभिहितत्वेन अत्यन्तं सरलतया च उत्तरटीका असांगत्यदोषालग्नकतया च उपपत्यन्तरं विना व्याख्यानात् टीकामर्मप्रकाशितत्वाच्च सर्वं निष्कलङ्कं उपपत्यन्तरकल्पना अनावश्यकं चेति ध्येयमित्यलं विस्तरेण ।।

***

चतुर्थो भागः

श्रीमद्विष्णुतत्त्वविनिर्णयः, टीका व्याख्यानानि च -

मूलम्-'इतिहासपुराणः पञ्चमो वेदानां वेदः' इति तद्गृहीतत्वाच्च ।

टीका - इतिहासश्च पुराणं चेति द्वन्द्वैकवद्भावः । नपुंसकत्वं तु नाश्रितम् । पुराणशब्दस्य विशेष्यलिङ्गत्वात् ग्रन्थविशेषणत्वेन पुंलिङ्गत्वमेवाश्रितम् इति।।

पां.टि. - नन्वेकवद्भावप्रयुक्तनपुंसकत्वाप्रसङ्गेऽपि 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति द्वन्द्वतत्पुरुषयोः परवल्लिङ्गविधानात् पुराणशब्दलिङ्गस्य नपुंसकस्यैव प्रसक्त्या इतिहासपुराण इति पुल्लिङ्गत्वानुपपत्तिः तदवस्थैव इत्यतो नियतलिङ्गानां विशेषणानां विशेष्यनिघ्नत्वाभावेऽप्यनियतलिङ्गानां विशेषणानां विशेष्यनिघ्नत्वेन तल्लिङ्गत्वनियमात्, ल्युडन्तपुराणशब्दस्यानियतलिङ्गत्वेन विशेष्यभूतग्रन्थलिङ्गवत्त्वस्यावश्यकत्वात् पुराणप्रतनप्रत्नपुरातनचिरन्तना इति विशेष्यनिघ्नत्त्वस्मरणाच्च न तदनुपपत्तिः इति आह - 'पुराणशब्दस्येति' इति ।।

व्या. टि. - नपुंसकत्वं तु इति । उक्तविधया परवल्लिङ्गमित्येतदपि न प्रवृत्तमित्यर्थः । (पुराणशब्दस्य नियतनपुंसकत्वेनेति भावः)। व्यत्ययेन पुंस्त्वमप्याश्रितमित्यवधेयम् । समाधानान्तरमाह पुराणशब्दस्येति।। एतत्पक्षेऽप्युक्तविधया 'स नपुंसकमिति' नाश्रितमिति ध्येयम् । परवल्लिङ्गमित्यनेन तु पुल्लिङ्गमेव। ग्रन्थविशेषे रूढस्य लोकप्रसिद्धनियतनपुंसकत्वस्वारस्याय विधिद्वयानाश्रयणं व्यत्ययेन पुंस्त्वाश्रयणं च पूर्वसमाधाने। एतत्समाधाने तु

व्यत्ययानाश्रयणपरवल्लिङ्गत्वस्वारस्याय ग्रन्थविशेषे रूढस्यापि विशेष्यनिघ्नत्वं एकवद्भावप्रयुक्तनपुंसकत्वानाश्रयणं च स्वीकृतमित्यव-धेयम् । द्वितीयसमाधाने विग्रहोऽपि पुल्लिङ्गेन कर्तव्यः ।

केचित्तु - परवल्लिङ्गमित्यनेन प्राप्तनपुंसकत्वपरिहाराय पुराणशब्दस्य विशेष्यवचनतया इति योजयित्वा 'पुराणप्रतनप्रत्न-पुरातनचिरन्तनाः' इति कोशानुसारेण पुरातनपर्यायस्य पुराण-शब्दस्य विशेष्यनिघ्नत्वमित्येकवाक्यतामाहुः। तेषां नपुंसकत्वेन विग्र-हप्रदर्शनम्, इतिहासस्यापि पुरातनग्रन्थत्वेन पृथक्कथनं, भागवतादिग्रन्थविशेषोपस्थानं च कथमिति चिन्त्यम् - इति ।

अत्र विमर्शः -

तत्र इतिहासस्यापि पुरातनग्रन्थत्वेन पृथक्कथनस्यायुक्तता-रूपः द्वितीयो दोषः नैव घटते । यदि भवत्पक्षेऽपि द्वितीयव्याख्या-नमाद्रियते तदा कुतो वा इतिहासस्य पृथक्कथनम् ? तदर्थं यत् समाधानमुच्यते युष्माभिः तदेव अस्माभिरपि कथ्यत इति नानु-पपत्तिगन्धोऽपि ।

नापि तृतीयः आक्षेपः । तत्रापि भवद्रीत्या द्वितीयसमाधा-नकल्पे यथा भागवतादिग्रन्थोपस्थानं तथैवास्मन्मतेऽपीति वक्तुं शक्यत्वात् । तथा चेदं प्रश्नद्वयम् उभयपक्षेऽपि समानमिति तत्र काचनोपपत्तिः कल्प्या; न तु इतरपक्षे दोषत्वेन कथनं युक्तमिति ।

अत्र प्रथमदोषस्तु सुतरां न युज्यते । समासात् पूर्वं विग्रहवाक्ये लोकप्रसिद्धिमनुसृत्यैव तथा कथनात् । समासानन्तरं क्लीबत्वं कुतो नाश्रितमित्येव खलु अत्र आशङ्कितं, समाहितं च । अतः गुरुराजीयाशयः दोषनिर्मुक्तः स्वरसश्च । मतान्तरे तु न मानम् । 'पुराणशब्दस्य' इत्यादिवाक्ये समाधानद्वयमुक्तमित्यत्र

नियामकाभावात्, विकल्पबोधकपदाभावात् । न च, प्राक् इतिहासश्च पुराणं चेति एकवद्भावे पुराणशब्दस्य नपुंसकत्वेन पठनं, ततश्च तस्य विशेष्यलिङ्गत्वात् ग्रन्थविशेषणत्वेन, पुल्लिङ्गत्वमेवाश्रितमिति पुराणशब्दस्य पुल्लिङ्गत्वाश्रयणमेव नियामकमिति वाच्यम् । 'सामान्ये नपुंसकम्' इति सामान्यत एव नपुंसकत्वाश्र-यणस्य उपपादयितुं शक्यत्वात् तथा चास्मत्पक्षोक्तरीत्या नपुंसकत्वस्योपपादयितुं शक्यत्वे, परिहारान्तरपरताद्योतकानां 'वाऽदि' शब्दानामभावेऽपि तथा व्याख्यानमयुक्तमिति भाति ।

किञ्चास्मिन् पक्षे 'पुल्लिङ्गत्वमेवाश्रितम्' इति एवकार-स्वारस्यानुरोधेन 'नपुंसकत्वं तु नाश्रितम्' इत्यतः परं प्रत्युतेति पूरणेन, एकवाक्यतया एव युक्ततया स्फुरणं बाधकं इत्यप्याभाति । अपि चास्मिन्नेव पक्षे 'नपुंसकत्वं तु नाश्रितम्' इत्यतः परं साकाङ्क्षताप्रयुक्तवाक्याभासतावारणाय व्यत्ययेन पुंस्त्वमेवाश्रित-मिति अध्याहर्तव्यम् । एवमुत्तरस्मिन् पुराणशब्दस्येति वाक्येऽपि साकाङ्क्षताप्रयुक्तवाक्याभासतावारणाय एकवद्भावप्रयुक्तनपुंसक-त्वानाश्रयणपरतयाऽपि एकं वाक्यमिति वक्तव्यं चेति अध्याहारः, व्याख्यानान्तरताद्योतक च वाऽदिशब्दाभावः,एकवाक्यतया स्फुरणं, एकवाक्यतया योजनसम्भवे अपि भिन्नवाक्यतया कल्पनं चेति बाधकानि दुष्परिहाराणि ।

अस्मत्पक्षस्तावन्निर्दुष्टः । पुराणशब्दस्य पूर्वं नपुंसकत्वाश्रयणं हि अभ्युपेत्यापि सङ्गच्छते । 'सामान्ये नपुंसकम्' इति सामान्यतो वेति एकवाक्यतापक्षे आरोपितानां दोषाणांम् अपाकृतत्वात्। इतिहासादिशब्दः एवं भागवतादिग्रन्थविशेषोपस्थानं च कुरुपाण्डवन्यायेनापि भवति। भवद्भिरपि द्वितीयसमाधानपक्षे एवमेव समाधातव्यत्वात् ।

एवं व्याख्यानान्तरतापक्षे परवल्लिङ्गत्वस्वारस्याय ग्रन्थविशेषे रूढस्यापि विशेष्यनिघ्नत्वमिति यदुक्तं तन्न; यतः ग्रन्थविशेषे रूढस्य विशेष्यनिघ्नत्वमदृष्टचरमेव । विशेष्यनिघ्ना हि न केवलं प्रयुज्यन्ते अपि तु विशेषवाचकसाहित्येनैव । यथा 'शुक्लः पटः' इत्यादि । नच अष्टादशपुराणवाचकस्य पुराणशब्दस्य पुल्लि-ङ्गत्वेनापि प्रयोगो दृष्टः । 'पुराणानि तदर्थानि' इत्यादौ केवलस्य तस्य क्लीबत्वेनैव प्रयोगदर्शनात्। यच्चोक्तं 'परवल्लिङ्गस्वारस्याय' इति तदप्यसाधु; तथाहि - तद्धि परवल्लिङ्गस्वारस्यं यद्विशेष्यवाचकपदस्य नपुंसकत्वेऽपि विशेषणवाचकपदस्य समासे प्रकृतिलिङ्गत्वेनाव-स्थानात् यथा 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति विशेष्यप्रतिपादकस्य प्रातिपदिकपदस्य क्लीबत्वेऽपि विशेषणस्य समासेऽपि प्रकृतिलिङ्गतया पुंस्त्वेनैवावस्थानम् । न चात्र तादृशं परवल्लिङ्गत्वमस्तीति कथं तद्युक्तम् ?

अत्र प्रतिविमर्शः

अस्मिन् सन्दर्भे श्रीपाण्डुरङ्गी आचार्याणां व्याख्यानस्योपरि दोषत्रयमुद्धाटितं श्रीमद्व्यासतत्त्वज्ञतीर्थैः । तच्च 'तेषां नपुंसकत्वेन विग्रहप्रदर्शनं कथमिति ?', इतिहासस्यापि पुरातनग्रन्थत्वेन पृथक्कथनं कथमिति ?,भागवतादिग्रन्थविशेषोपस्थानं च कथमिति ? चिन्त्यम् । अधिकं तु गुरुप्रभायां द्रष्टव्यम् इति ॥

'इतिहासः पुराणं च' इति द्वन्द्वैकवद्भावः । द्वन्द्वैकवद्भावे स नपुंसकमिति सूत्रेण पुराणशब्दस्य नपुंसकत्वप्राप्त्या 'सर्वे विधयः छन्दांसि विकल्पन्ते' इति वचनेन नपुंसकत्वस्य वैकल्पिकत्वेन पुल्लिङ्गत्वोपपत्ति इत्यतः नपुंसकत्वं तु नाश्रितम् इति व्याख्या कृता । ततः एवमुच्यते एकवद्भावप्रयुक्तनपुंसकत्वाप्रसङ्गेऽपि परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति परवल्लिङ्गत्वानुपपत्तिः तदवस्थैवेति

चेत् नियतलिङ्गानां विशेषणानां विशेष्यनिघ्नत्वाभावेन तल्लिङ्गत्व नियमात्, पुराणशब्दस्तु अनियतलिङ्ग इति विशेष्यभूतग्रन्थ विशेषणत्वेन पुल्लिङ्गत्वात् कोशेनापि पुल्लिङ्गत्वस्मरणाच्च न तदनुपपत्तिरेवेति वदन्ति । एवमेव पुराण-प्रतन-प्रत्नपुरातन-चिरन्तना इति विशेष्यनिघ्नत्वस्मरणस्य न तदनुपपत्तिरिति उभयोर्वाक्ययोः एकवाक्यतापरव्याख्यानं श्रीपाण्डुरङ्गी आचार्यैः कृतम् ।

पाण्डुरंगीव्याख्यानोपरि ऐजी आचार्याणां विमर्शः

अत्र श्री ऐजी आचार्यैः (श्रीव्यासतत्वज्ञतीर्थैः) विमर्शः क्रियते । तथाहि - श्रीपाण्डुरङ्गी आचार्याणां पक्षे नपुंसकत्वेन विग्रहः कथमिति; यतो हि पुराणशब्दस्य पुरातनार्थकत्वे पुलिङ्ग-त्वापत्या पुल्लिङ्गपरतया विग्रहप्रदर्शने च 'इतिहासपुराणं चेति' नपुंसकत्वेन विग्रहप्रदर्शनपरटीकाविरोधः भवति, अतः तैः नपुंस-कत्वेन विग्रहः कथमिति आक्षेपः कृतः । इतिहासस्यापि पुरातन-ग्रन्थत्वेन पृथक्कथनं कथं सङ्गच्छते ? इति च । एवं भागवता-दिग्रन्थविशेषोपस्थानं च कथमिति चिन्त्यमित्युक्तवन्तः ।

किञ्च अत्रस्थटीकावाक्यद्वयम् एवं व्याख्यातं श्रीव्यासतत्वज्ञ-तीर्थैः । 'स नपुंसकं' 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति विधिद्वयेन नपुंसकत्वप्राप्तिरिति चेन्न 'स नपुंसकं' इत्यनेन प्राप्तस्य नपुंसक-त्वस्य 'सर्वे विधयः छन्दांसि विकल्पन्ते इत्यनेन च न नपुंसकत्व-मिति भावः ।

एवं पुराणशब्दस्य नियतलिङ्गत्वेन (नपुंसकत्वेन) परवल्लिङ्गमित्यनेन न नपुंसकत्वम् अपि तु व्यत्ययेन पुल्लिङ्गत्वमा श्रितम् । अतः पूर्वसमाधाने ग्रन्थविशेषे रूढस्य लोकप्रसिद्धनियतन पुंसकत्वस्वारस्याय विधिद्वयानाश्रयणं व्यत्ययेन पुंस्त्वाश्रयणं च ।

समाधानान्तरे तु (पुराणशब्दस्येति टीकाव्याख्यानसन्दर्भे च) ग्रन्थविशेषे रूढस्यापि विशेष्यनिघ्नत्वम्, एकवद् भाव-प्रयुक्तनपुंसकत्वानाश्रयणं च स्वीकृतम्। एतत्समाधाने विग्रहः पुल्लिङ्गेन करणीयश्चेति ।

इतिहासस्यापि पुरातनग्रन्थत्वेन पृथक् कथनस्यायुक्तत्व-रूपः दोषः श्रीमद्व्यासतत्वज्ञश्रीमच्चरणैरुक्तः । तत्परिहाराय यत्नः न कृतः । अपितु कोशः सर्वेषां समानः, तदर्थं यत् समाधानमुच्यते तदेवास्माभिः कथ्यत इति नानुपपत्तिगन्धोऽपि इत्युक्तं विमर्शकारैः। **तदपि न चारु ।** यतो हि श्रीमद् व्यासतत्वज्ञश्रीमच्चरणैः कोशो न उदाहृतः लघुप्रभायामस्मिन् सन्दर्भे । तेनेदं ज्ञायते पुराणशब्दस्य कोशानुसारेण पुरातनार्थकत्वं तैः न स्वीकृतम्। अत एव 'ग्रन्थविशेषे रूढस्यापि' इति तैरुक्तम्। पुरातनार्थकत्वे तु पुराणशब्दः यौगिकः भवितुमर्हति । नतु रूढः। एवं च पुराण-शब्दस्य प्रसिद्धार्थम् अपरित्यज्य नपुंसकलिङ्गत्वमात्रं निराकृतम्। पुल्लिंगत्वं चाश्रितम्। तथा च ऐजी आचार्याणां मते इतिहासः न पुराणशब्दार्थः। अतः तस्य पृथक् कथनं युज्यते । भागवतपुराणस्य संग्रहोऽपि भवतीति न पाण्डुरङ्गीपक्षोक्त दोषः अस्मत्पक्षेति ।

यदुक्तं **पुराणशब्दस्येति टीकावाक्ये समाधानद्वयमुक्तमि-त्यत्र नियामकाभावात्, विकल्पबोधकपदाभावात इत्यादि । तदपि न सम्यक् ।** एकस्य वाक्यस्य व्याख्यानकरणसन्दर्भे अभिप्रायद्वयं, त्रयं वा वक्तुं सर्वेषां व्याख्याकाराणां स्वातन्त्र्यं वर्तते । टीका-वाक्यस्य च बह्वर्थोपेतत्वं च वर्तत इति सर्वैरपि अङ्गीकृतोऽयं विचारः । नात्र विप्रतिपत्तिरस्ति । नियामकपदानां 'च' 'वा' इत्यादिसापेक्षतापि नास्ति । दर्शितं च टीकाकृत्पादैरेवान्यत्र 'प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य हि' इत्यनुव्याख्यानस्य

एकस्याः पङ्क्तेः बहुधा व्याख्यानम् । तत्र नियामकपदाभावेऽपि जाज्वल्यमानतया अनेकशः अभिप्रायप्रकटीकरणं प्रत्यक्षसिद्धमिति नापलपितुं शक्यते । अतः टीकागाम्भीर्यप्रकटनाय 'चित्रैः पदैश्च गम्भीरैः' इति वचनस्य सार्थकीकरणाय च 'प्रकटीकृतटीकोक्तिः' इति विशेषणभाजैः श्रीमद्व्यासतत्वज्ञतीर्थैः द्वित्रि अभिप्रायप्रकटनं च अत्यन्तसाधुरेवेति मन्तव्यम् ।

भिन्नवाक्यतापरव्याख्याने नियामकपदानामभिधानम् -

एतदुपरि एवमुच्येत 'प्रत्यक्षवच्च प्रामाण्यम्' इत्यादिस्थले अभिप्रायभेदेन बहुधा व्याख्यानं यत्कृतं तत् सत्यमेव न अपल-पामः। अथापि तत्र प्रत्यक्षवच्च इत्यत्र चकारः व्याख्यानान्तर-द्योतकः इति विलिख्य नियामकं 'च' कारपदं प्रदर्शितम् । तेन च तत्र बहुधा व्याख्यानं टीकासम्मतमिति वक्तुं शक्यते । अत्र तु किमपि नियामकं पदं नास्ति । नियामकपदाभावेऽपि विभिन्ना-भिप्रायकटीकाव्याख्यानकरणं कथं समञ्जसं भवति? अतः 'च' 'वा' इत्यादीनामभावेऽपि अभिप्रायभेदेन व्याख्यानकरणं निर्मूलं भवतीति चेत् । न । अस्त्यत्र टीकायां नियामकं पदम्; 'नपुंसकत्वं तु' इत्यत्र तुशब्दः। तुशब्दस्य वैलक्षण्यमर्थः । अव्ययानामनेकार्थता इत्यस्य विद्यमानत्वात् । एवमेव द्वितीयसमाधाने 'पुल्लिङ्गत्व-मेवाश्रितम्' इत्यत्र एवकारो वर्तते । तस्य अभिप्रायभेदकव्या-ख्यानान्तरमप्यर्थः वक्तुं शक्यते । अतः केवलाभिप्रायद्वयपरव्या-ख्याने 'च' 'वा' इत्यादिनियामकपदं नास्तीति कथनं यत्किञ्चिदेतदित्यलमतिविस्तरेण।

वस्तुतस्तु एकवाक्यतया व्याख्यानं न स्वरसम् । नपुंसकत्वं नाश्रितमित्यनेनैव पुल्लिंगत्वाश्रयणप्रतीतेः पुल्लिंगत्वमेवाश्रित-मिति कथनस्य अनावश्यकत्वात् ।

यदुक्तं विमर्शकारैः **'पुल्लिङ्गत्वमेवाश्रितम्' इति एवकार-स्वारस्यानुरोधेन 'नपुंसकत्वं तु नाश्रितम्' इत्यतः परं प्रत्युतेति पूरणेन एकवाक्यतया एव युक्ततया स्फुरणं बाधकमित्यप्याभाति । अपि चास्मिन्नेव पक्षे 'नपुंसकत्वं तु नाश्रितम्' इत्यतःपरं साकाङ्क्षताप्रयुक्तवाक्याभासतावारणाय व्यत्ययेन पुंस्त्वमेवाश्रित मिति अध्याहर्तव्यम् । एवमुत्तरस्मिन् पुराणशब्दस्येति वाक्येऽपि साकाङ्क्षताप्रयुक्तवाक्याभासतावारणाय एकवद्भावप्रयुक्तनपुंसक-त्वानाश्रयणपरतयाऽपि एकं वाक्यमिति वक्तव्यं चेति अध्याहारः । वाक्यान्तरताद्योतक 'च' 'वा'ऽदिशब्दाभावः एववाक्यतया स्फुरणम्, एकवाक्यतया योजनसम्भवेऽपि भिन्नवाक्यतया कल्पनं चेति बाधकानि दुष्परिहराणि इति । तदशुद्धम् ।** तथाहि-

एकवाक्यतापरव्याख्यानक्रमः -

प्रत्युतेति पदाध्याहारेण 'नपुंसकत्वं तु' इत्यादिटीकावाक्य-द्वयस्यापि एकवाक्यता अस्तीति पाण्डुरङ्गीभट्टारकाणामाशय इति भवन्तः वदन्ति। अयं च एकः व्याख्यानक्रमः। अस्मिन् क्रमे च-

१. पुराणशब्दस्यानियतलिङ्गत्वं वर्तते;

२. परवल्लिङ्गमित्यनेन नपुंसकत्वं वदन्ति;

३. कोशः प्रमाणतया गृहीतः ।

इत्यादयो विषयाः स्वीकृताः विद्यन्ते । केवलं प्रत्युतेति पदाध्याहारेण लाघवमस्तीति भवतामाशयः । एतदपेक्षया व्यास-तत्वज्ञश्रीमच्चरणैः भिन्नक्रमः अनुसृतः । स च क्रमः एवं वर्तते -

भिन्नवाक्यतापरव्याख्यानक्रमः -

१. पुराणशब्दस्य नियतनपुंसकत्वं वर्तते;

२. विधिद्वयानाश्रयणं, व्यत्ययेन पुंस्त्वमपि वर्तत इति ;

३. समाधानान्तरे च व्यत्ययानाश्रयणविशेष्यनिघ्नत्वं, एकवद्भावप्रयुक्तनपुंसकत्वानाश्रयणं च वर्तते ।

४. कोशः प्रमाणत्वेन न गृहीतोऽत्र ।

इत्यादयो विषयाः स्वीकृताः विद्यन्ते । तथा चास्माकं पुरतःएकवाक्यतापरव्याख्यानं, भिन्नवाक्यतापरव्याख्यानं च वर्तेते ।

इदमत्रावधेयम् - यत्र एकवाक्यतापरव्याख्यानद्वयं स्यात् तत्रैव लाघव-गौरव-साधकबाधकचिन्ताप्रसक्तिःभवति। न तु भिन्नव्याख्यानस्थले।यतो हि तत्र अभिप्रायान्तरभेदः, अभिप्रायजनकसामग्रीभेदश्च वर्तते, तेन च टीकागाम्भीर्यस्य प्रकटीकरणं, टीकायाः अखण्डित्वं च स्फुटीकरणं च भवति । तस्मात् लाघवगौरवचिन्ता, साधकबाधकचिन्ता च नैवात्र वर्तते ।

पाण्डुरंगीय एकवाक्यतापरव्याख्याने अस्वारस्यम् -

किञ्च एकवाक्यतापरव्याख्यानभिन्नवाक्यतापरव्याख्यान-योः मध्ये ऐजी आचार्यैः एकवाक्यतापरव्याख्यानं सम्परित्यज्य भिन्नवाक्यतापरव्याख्याने आदरश्च प्रदर्शितः। कुतः? इति चेदस्ति महदस्वारस्यम् एकवाक्यतापरव्याख्याने । तच्चैवमस्ति । तथाहि-पुराणशब्दस्य नियतनपुंसकत्वमस्ति। 'पुराणानि तदर्थानि' इत्यादिषु सर्वत्र नियतनपुंसकत्वमुररीकृतं वैयाकरणैः । परं(तु) श्रीपा-ण्डुरङ्गी आचार्यैः लुडन्तपुराणशब्दस्यानियतलिंगत्वेन इति अनियतलिङ्गत्व-मङ्गीकृतम्। लोकप्रसिद्धनियतनपुंसकत्वविषये पुराणशब्दस्य किमपि व्याख्यानमकृत्वा लुडन्तपुराण शब्दस्यानियतलिङ्गत्वमभिहितम् इति प्रथममस्वारस्यम् ।

पाण्डुरङ्गीयव्याख्याने द्वितीयमस्वारस्यम् -

'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (२/२/२६) इति सूत्रेण पुराणशब्दस्य नपुंसकत्वमभिहितं श्रीपाण्डुरङ्गीभट्टारकैः । परं तु

'स नपुंसकम्' (२/४/१७) इति सूत्रेण पुराणशब्दस्य नपुंसकत्वविधिः श्रूयते । यतो हि एतत्सूत्रं परसूत्रं भवति । व्याकरणशास्त्रे केवलपूर्वसूत्रपरसूत्रयोः बाध्यबाधकभावो नास्ति । किन्तु सामान्यशास्त्रविशेषशास्त्रयोर्बाध्यबाधकभावः भवति। प्रकृते 'परवल्लिङ्गम्' इति पूर्वसूत्रं सामान्यसूत्रं भवति । 'स नपुंसकम्' इति उत्तर-सूत्रं विशेषसूत्रं भवति । तथा च प्रकृते 'स नपुंसकम्' इति विशेषसूत्रं सामान्यसूत्रं परवल्लिङ्गं बाधते । भट्टोजिदीक्षितकौमुद्यां **ममसमाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात्। परवल्लिङ्गापवादःफक्ष** इत्युक्तम् । तथा च 'परवल्लिङ्गम्' इति सूत्रेण नपुंसकत्वोक्तिः पुराणशब्दस्येति द्वितीयमस्वारस्यमिति मम भाति। अत एव मन्त्रालयश्रीराघवेन्द्रतीर्थैरपि 'स नपुंसकम्' इति सूत्रेण नपुंसकत्वं विहितं दृश्यते । तथाहि ननु द्वन्द्वैकवद्भावे 'स नपुंसकम्' इति नपुंसकेन भाव्यमित्यत आह - नपुंसकत्वं तु इति ।। (वि. नि.रा.टि. ९० पृ) इति । एवमेव वंशपल्लिटिप्पण्यां च **'ननु तर्हि स नपुंसकम् यस्यैकवद्भावः स नपुंसकं स्यादित्येकवद्भावे नपुंसकत्वविधाना-दितिहासपुराणमिति स्यादित्यत आह- नपुंसकत्वमिति।।** इत्युक्तमस्ति । सर्वैरपि 'परवल्लिङ्गं' सूत्रं विहाय 'स नपुंसकम् ' इत्यने-नैव नपुंसकत्वविधानं कृतं दरीदृश्यते ।

'प्रयोगशरणाः वैय्याकरणाः' इत्युक्तत्वेन लोकरीत्यापि पदानां साधुत्वं समर्थयन्ति वैय्याकरणाः । पुराणशब्दस्य अनियत-लिङ्गत्वेन विशेष्यनिघ्नत्वं स्वीकृतं श्रीमद्व्यासतत्वज्ञतीर्थैः। तथा च अष्टादशपुराणवाचकस्य पुराणशब्दस्य नियतनपुंसकत्वमङ्गीकृत्य प्रथमसमाधानमभिहितम् । विशेष्यनिघ्नत्वाय पुराणशब्दस्य अनि-यतलिङ्गत्वमप्यभिहितम् द्वितीयसमाधाने। इत्थं च लोकप्रसिद्ध-नियतनपुंसकत्वस्वारस्याय विधिद्वयानाश्रयणं व्यत्ययेन पुंस्त्वाश्र-यणं

च प्रथमसमाधाने। द्वितीयसमाधाने तु व्यत्ययानाश्रयणविशेष्य-निघ्नत्वम्, एकवद्भावप्रयुक्तनपुंसकत्वानाश्रयणं च स्वीकृतम् । अतः भिन्नव्याख्यानक्रमः स्वीकृतः इत्यवधेयम् ।

विशेष्यनिघ्नत्वमदृष्टचरमेवेत्यस्य निरासः -

यदप्युक्तं **यतः ग्रन्थविशेषे रूढस्य विशेष्यनिघ्नत्वमदृष्ट-चरमेव। विशेष्यनिघ्ना हि न केवलं प्रयुज्यन्ते अपि तु विशेष्य-वाचकसाहित्येनैव । यथा शुक्लः पटः इत्यादि ।** (वि.१२ पृ.) । तदप्यशुद्धम् । विशेष्यानुसन्धानेनापि विशेष्यनिघ्नत्वं सम्भवत्येव । यथा पटपदाप्रयोगे तदनुसन्धानपूर्वकं 'शुक्लः' इति पदप्रयोगः इति दृष्टचरमेव भवति। तथा पुराणशब्दस्य ग्रन्थविशेषे रूढस्य विशेष्य-निघ्नत्वं वक्तुं शक्यते । अतः विशेष्यनिघ्नत्वमदृष्टचरमेवेति विमर्शः असाधुः भवति ।

यदुक्तं **'परवल्लिङ्गस्वारस्याय' इति तदप्यसाधु । तथाहि तद्धि परवल्लिङ्गस्वारस्यं यद् विशेष्यवाचकपदस्य नपुंसकत्वेऽपि विशेषणवाचकपदस्य समासे प्रकृतिलिङ्गत्वेनावस्थानम् यथा 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ' इति विशेष्यप्रातिपदिकस्य प्रातिपदिकपदस्य क्लीबत्वेऽपि विशेषणस्य समासेऽपि प्रकृति-लिङ्गतया पुंस्त्वेनैवावस्थानम् । न चात्र तादृशं परवल्लिङ्ग-त्वमस्तीति कथं तद्युक्तम्** ? (वि.१२ पृ.) इति । **तदप्यचारु ।।** यतो हि 'यद् विशेष्यवाचकपदस्य' इत्यादिना परवल्लिङ्ग-सूत्राशयः अभिहितः सः न परवल्लिङ्गसूत्रार्थः भवति। **'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः'** इति सूत्रार्थस्तु **'एतयोः परपदस्यैव लिङ्गं स्यात्'** इति । 'कुक्कुटमयूर्यौ' इत्युदाहरणं भवति । द्वन्द्वे तत्पुरुषे च पदद्वयमध्ये उत्तरपदलिङ्गं यद्भवति तदेवलिङ्गं भवतीत्यर्थः। प्रकृते कुक्कुटश्च मयूरी च 'कुक्कुटमयूर्यौ' इति भवति। अत्र पूर्वपदं

कुक्कुटपदं पुल्लिङ्गे वर्तते । उत्तरपदं मयूरीपदं स्त्रीलिङ्गे वर्तते । तथा च प्रकृते द्वन्द्वसमासस्य परपदं मयूरीपदं स्त्रीलिङ्गे वर्तत इति तदेव लिङ्गं (परवल्लिङ्गं) भवति, कुक्कुटमयूर्यौ इति। तथा च उपर्युक्तयद्विशेष्यवाचकपदस्य इत्यादिविवरणं तु परवल्लिङ्ग-सूत्रार्थः नैव भवति। तादृशसूत्रार्थाभिनिवेशनद्वारा 'अर्थवदधातु-रप्रत्ययः प्रातिपदिकम्' इति लक्षीकरणं, तादृशपरवल्लिङ्गं अत्र नास्तीत्यभिधानम् अयुक्तमित्याशयोऽवशिष्यते।

परवल्लिंगसूत्रस्वारस्यम् -

परवल्लिङ्गसूत्रस्वारस्यं तु इदं भवति द्वन्द्वे तत्पुरुषे च समासघटकोत्तरपदं यल्लिङ्गे वर्तते तदेव लिङ्गं भवतीति तल्लिङ्गं पुल्लिङ्गं वा स्त्रीलिङ्गं वा नपुंसकलिङ्गं वा भवतु इति। तदेवोक्तं काशिकावृत्तौ **'परस्य यल्लिङ्गं तद्भवति द्वन्द्वस्य तत्पुरुषस्य च । उत्तरपदलिङ्गं द्वन्द्वतत्पुरुषयोर्विधीयते । कुक्कुटमयूर्याविमे'** इति (का.वृ.२७०-२७१पृ.)। एवमेव वैय्याकरणमूर्धन्येन हरदत्तेनापि पदमञ्जर्यां **तत्पुरुषः द्विविधः पूर्वपदार्थप्र-धानोऽर्धपिप्पल्यादिः । उत्तरपदार्थप्रधानो राजकुमार्यादिः । तत्रोत्तरपदार्थप्रधाने प्राधान्यादेव परवल्लिङ्गस्य सिद्धत्वात् पूर्वपदा-र्थप्रधाने विध्यर्थं भवति । तत्र वृत्तिकारेण विधिपक्षाश्रितः, तदाह परस्य यल्लिङ्गं तद्भवतीति ।। यदा द्वन्द्वे, तत्पुरुषे च विषये पर-स्यैव लिङ्गं भवतीत्यक्षरार्थः ।** (प.मं.२७० पृ.)

पदमञ्जरीव्याख्यानकर्तृन्यासस्याशयः -

एवमेव पदमञ्जरीव्याख्याने न्यासेनापि **'परवल्लिङ्गं द्वन्द्व-तत्पुरुषयोरिति।। किमर्थमिदम्? इहायं द्वन्द्वसर्वपदार्थप्रधानः, सः यदा भिन्नलिङ्गावयवो भवति तदा पूर्वोत्तरयोः पदयोर्भिन्न-लिङ्गयोरनुग्राहकमेकं लिङ्गं नास्ति येन समुदायो व्यपदिश्यते ।**

उभाभ्यां च युगपदसम्भवादशक्यो व्यपदेशः कर्तुम्, अतः पर्यायः स्यादिति द्वन्द्वे नियमार्थं वचनम्' इति (न्यासे १७०पृ.) तस्मात् परवल्लिङ्गस्वारस्याय ग्रन्थविशेषे रूढस्यापि विशेष्यनिघ्नत्वं स्वीकृतम् ऐजीआचार्यैः ।

व्याकरणमहाभाष्ये परवल्लिंगसूत्रप्रत्याख्याने समाधानम् -

एतदुपरि एवमुच्येत - पूर्वोक्तरीत्या स्वारस्योपेतपरव-ल्लिङ्गसूत्रं व्याकरणभाष्ये कुतो वा प्रत्याख्यातमिति प्रश्नः अवशिष्यते । अर्थात् पतञ्जलिना परवल्लिङ्गसूत्रं नैव व्याख्यातम्। अपि तु परित्यक्तमिति भवतां प्रतिविमर्शः असमर्थः भवति इति चेत् । सत्यम् । इदं सूत्रं भाष्ये प्रत्याख्यातं वर्तते । अत्र प्रत्याख्यातं नाम 'अनेन यः अर्थः लभ्यते तस्य प्रकारान्तरेणापि लाभात् तस्यावश्यकता नास्तीत्यर्थः। नतु सुतरां सूत्रं मास्तु इत्यत्र तात्पर्यम्। तथा च प्रकारान्तरेण परवल्लिङ्गसूत्रप्रयोजनं लभ्यते चेत् तदा तत्रैव भाष्यकाराणामभिनिवेश इति ज्ञातव्यम्। न तु सर्वथा सूत्रं मास्तु इति तात्पर्यम् । अन्यथा अष्टाध्यायीसूत्रपारा-यणजन्यअदृष्टहानिः स्यात् इति नागेशादिप्रभृतिभिः व्याख्यातं वर्तते। तथा च प्रकृते परवल्लिङ्गस्वारस्याय विशेष्यनिघ्नत्वम्, एकवद्भावप्रयुक्तनपुंसकत्वानाश्रयणं च द्वितीयसमाधाने स्वीकृत्य व्याख्यानकरणं बहुसमञ्जसमिति अलमतिविस्तरेण ।

एतद्विषये दोषत्रयमेवाभिहितम् । इतोऽप्यस्ति महान् दोष इति प्रदर्शनाय 'अधिकं तु गुरुप्रभायां द्रष्टव्यम्' इत्युक्तम् । अहो! ऐजी आचार्याणां व्याकरणशास्त्रपरिनिष्ठितप्रमा। अद्भुतं च टीकामर्मप्रकाशनव्याख्यानम् । प्रतीक्षते च मे मनः श्रीमद्व्यासतत्त्व-ज्ञकृतगुरुप्रभायां व्याकरणादिशास्त्रगतपरिपक्वबुद्धिम् ।। इति शम् ।

***

पञ्चमो भागः

श्रीमद्विष्णुतत्त्वनिर्णयः, टीका, व्याख्यानानि च -

मूलम्- प्रामाण्यं स्वत एव । अन्यथा अनवस्थानात् ।। (वि.नि. १५५पृ.)

टीका- साक्षी स्वयंप्रकाशः स्वात्मानं स्वप्रामाण्यं च गोचर-यतीत्यङ्गीकारात् । ज्ञानस्यैव तथाभावो अभ्युपगम्यतामिति चेत्, अन्तःकरणवृत्तेर्ज्ञानस्य जडत्वेन स्वयंप्रकाशत्वायोगात् इति- (वि.नि.टी १५५ पृ.)

पां.टि.- ज्ञानस्यैवेति।। लाघवादिति भावः। अन्तः करणवृत्तेरिति।। ननु जडत्वं न स्वप्रकाशत्वाभावे प्रयोजकम् । अन्यथा साक्षिणोऽपि चेतनत्वात् स्वप्रकाशत्वं न स्यादिति चेन्न । क्रियायाः कारकप्रयोज्यत्वस्य सकलवादिसम्मतत्वेन प्रयोजकस्य च प्रयोज्या-पेक्षया पूर्ववृत्तित्वनियमात् ज्ञप्तिरूपक्रियायाः स्वकर्मकत्वे स्वापे-क्षया स्वस्य पूर्वभावित्वरूपाऽऽत्माश्रयापत्त्या स्वकर्मकप्रकाशत्व-रूपस्वप्रकाशत्वमनुपपन्नमेव ।

जडत्वं चात्र जन्यत्वरूपं ग्राह्यम्। साक्षिणस्त्वनादिनित्यत्वे-नोत्पत्त्यर्थमन्यानपेक्षणादनादितः स्वविषयकत्वे न काप्यनुपपत्तिः । एतच्च 'कर्मकर्तृव्यपदेशाच्च' इत्येतत्सुधाग्रन्थे स्पष्टम्।। इति। (पा. टि१६०-१६१ पृ)

व्या.टि.- अत्रेदं समाधीयते । जडत्वेन स्वप्रकाशत्वं व्यासेधता यज्जडत्वव्यावृत्तं तदिह विवक्षितम् । न स्वविषयत्वमात्रम् । तच्च स्वप्रमातृत्वम् । जडत्वस्याप्रमातृत्वरूपत्वात् । यथोक्तमन्यत्र 'जडत्वं चाप्रमातृत्वमेव' इति। तथा चाप्रमातृत्वेन स्वप्रमातृत्वा-भावसाधनं युक्तम् सामान्याभावस्य विशेषाभावव्याप्यत्वेन तेन

तत्साधनसौलभ्यात् । इत्थं च मनोवृत्तिः न स्वप्रमात्री अप्रमातृत्वात्, यदेवं तदेवं यथा घट इति युक्तेरभिप्रेतत्वात् न काप्यनुप-पत्तिरिति ।। (व्या.टि. १६४.पृ)

केचित्तु 'जडत्वेन जन्यत्वेन स्वकर्मकत्वमनुपपन्नम् । कर्मका-रकस्य कारणत्वेन स्वस्य स्वपूर्ववृत्तित्वे आत्माश्रयापत्तेरित्याहुः । तदस्वरसम् । भविष्यत इवाकारणत्वेऽपि कर्मकारकत्वोपपत्तेः' इति (व्या.टि.१६४)

अत्र विमर्शः -

अत्रेदं समाधानमवधार्यम् । तदित्थं - पाण्डुरङ्गीटिप्पण्यां क्रियासामान्यस्य एव कारकप्रयोज्यत्वे सकलवादिसम्मतिरस्ती-त्युक्तम् । तथा च ज्ञप्तिरूपक्रियाया अपि कारकप्रयोज्यत्वमस्तीत्य-ङ्गीकृतं भवति; तत्तु न सङ्गच्छते परोक्षे ज्ञाने भविष्यतोऽपि घटादेः विषयत्वानुभवेन व्यभिचारात् इति आपाद्यते चेदिष्टमेव नः। न वयं ज्ञानसामान्यस्य क्रियारूपत्वेन कारकसापेक्षतां ब्रूमः, अपि तु प्रत्यक्षज्ञाने एव । एवं च पूर्वोक्तापादनं नास्माकं मते वक्तुं युक्तम्। अत्र स्वविषयकत्वेनोच्यमानस्य ज्ञानस्य प्रत्यक्षत्वं 'ज्ञप्ति-रूपक्रियायाः स्वकर्मकत्वे' इत्यनेन सूचितम् ।

अथ प्रत्यक्षात्मके ज्ञानेऽपि कर्मादिकारकं कुतोऽपेक्ष्यते ? इति चेत् तत्रेदमुत्तरम् । ज्ञानं खलु क्रियारूपं कार्यम् । तस्य प्रत्यक्षात्मकस्योत्पादे सन्निकर्षस्य कारणतां सर्वे वादिनः अभ्युप-गच्छन्ति । सन्निकर्षो हि इन्द्रियार्थयोः सम्बन्धः । यथा चक्षुरूपयोः सन्निकर्षः रूपप्रत्यक्षे । तथा च सन्निकर्षोपपत्त्यर्थं सम्बन्धिभूत-स्यार्थस्य पूर्ववृत्तित्वमावश्यकम् इति प्रत्यक्षे कर्मकारकसापेक्षता सिद्धा।।

नन्वस्तु प्रत्यक्षस्य कर्मकारकप्रयोज्यत्वं तथापि मनोवृत्तिज्ञानस्य अनुमितिशब्दाद्यात्मकस्य कर्मकारकप्रयोज्यत्वम-सिद्धमिति तु नाशङ्कनीयम्। तादृशानुमित्याद्यात्मकस्यापि वृत्तिज्ञानस्य स्वकर्मकत्वे आशङ्किते, विषयीभूते स्वस्मिन् तस्य प्रत्यक्षरूपत्वात् । स्वस्य विषयीकारे तस्य ज्ञानस्य लिङ्गाद्यनु-सन्धानस्यानपेक्षणत्वात् । एवं च स्वविषये लिङ्गाद्यनुसन्धानरहिते, बाह्यार्थगोचरे, स्वकर्मके वृत्तिज्ञाने लौकिकमानसप्रत्यक्षात्मके, कर्मकारकापेक्षा सुतरामस्तीति स्वस्य स्वपूर्ववृत्तित्वमावश्यकम् । तत्तु न सम्भवति । अतः जन्ये वृत्तिज्ञाने न स्वकर्मकत्वमुपपद्यते इति केशवभट्टारकैः टीकाया आशयो वर्णितः ।

ननु मानसप्रत्यक्षं हि तादृशं स्वविषयकं मनोवृत्तिज्ञानमिति कथितम् । तत्र सन्निकर्षार्थं तद्विषयीभूतस्य स्वस्य पूर्ववृत्ति-ताऽऽवश्यकी । सा नोपपद्यते इति चोपपादितम् । परन्तु सन्निकर्षः तादात्म्यमेव इत्यङ्गीकुर्मः । तदा पूर्वं स्वस्याभावेऽपि तदात्म्यस-न्निकर्षस्तु उपपद्यत एवेति ज्ञानस्यैव स्वकर्मकत्वे न कोऽपि हानिरिति चेदत्रोच्यते - उपादानस्य मनसः तज्जन्यज्ञानस्य च यद्यपि तादात्म्यमस्ति, तथापि यस्मिन् क्षणे सन्निकर्षः तदैव ज्ञानोत्पादा सम्भवेन, तादात्म्यरूपसन्निकर्षादव्यवहितोत्तरमेव स्वविषयक ज्ञानमिति वाच्यम् । ततश्च ज्ञाने जाते सन्निकर्षः, सन्निकर्षे सम्पन्ने सत्येव ज्ञानमित्यन्योन्याश्रयापत्तिरिति तादात्म्यस्य सन्निकर्षत्वं न घटते ।

यदि च प्रथमं ज्ञानमुत्पद्यते, तदनन्तरं तादात्म्यं, तदनन्तरं च ज्ञानस्य स्वविषयकत्वमित्युच्यते तर्हि ज्ञानस्य प्रथमक्षणे अज्ञातत्वापत्त्या, 'ज्ञानं स्वविषयकमेवोत्पद्यते' इति स्वमतविरो-धप्रसङ्गः ।

यद्यपि अनुत्पन्नमपि कार्यम् उपादानाभिन्नमिति, ज्ञानो-त्पत्तेः पूर्वमपि तादात्म्यसन्निकर्षसद्भावः तथापि तस्य सन्निकर्षत्वं नास्ति। कारणात्मना स्थितस्य वस्तुनः सन्निकर्षः विशिष्य तस्य ज्ञानं न जनयतीत्यङ्गीकारात् अन्यथा मृदादिरूपेण विद्यमानस्य घटादेः चक्षुःसंयोगेन घटत्वेन घटज्ञानं जायतामित्यापत्तेः ।

किञ्च ज्ञानोत्पत्तेः पूर्वं ज्ञान - मनसोस्तादात्म्यमपि कारणा-त्मना एव भवति न तु कार्यात्मना इति कारणात्मना स्थितस्य तस्य ज्ञाने स्वविषयीकरणप्रयोजकत्वासम्भवात् न सन्निकर्षत्वम्। न च कारणात्मना स्थितस्यापि तादात्म्यस्य कारणत्वमस्तु इति वाच्यम्; कारणात्मना विद्यमानस्य घटादेः सकाशात् जलाहरणा-दिव्यवहारः स्यादित्यापत्तेः । न च तत्रैव कार्यात्मना वर्तमानस्य तादात्म्यस्य ज्ञानकारणत्वाभावात् स्वविषयकज्ञानप्रयोजकसन्नि-कर्षत्वमसिद्धम् । प्रत्यक्षस्थले सर्वत्रापि संयोगादिसन्निकर्षस्य संयोगत्वादिना रूपेण स्थितस्यैव कारणतायाः दृष्टचरत्वात् । तथा च अत्र तादात्म्यस्य सर्वथा न सन्निकर्षत्वम् । साक्षिस्थले तावत् तादृशतादात्म्यस्य ज्ञानप्रयोजकत्वं प्रमाणसिद्धम्; धर्मिग्राहकमा-नेनैव सिद्धत्वात् । अत्र मनोवृत्तौ तु प्रमाणं विना सर्वमेतत्कल्प्य-मिति न स्वविषयकत्वं युक्तम् । अत एव कार्यसहभावेनैव तादात्म्यस्य स्वज्ञान(स्वविषयीकरण) कारणत्वमस्तु इत्यपि अपास्तम्; तत्कल्पनेऽपि मानाभावात् । इति दिक् ।

(तादात्म्यस्य कारणात्मनाऽवस्थानं, न कार्यात्मना इत्यादि-व्यवहारस्तु सुधायाम् अनित्यवस्तुगतभेदस्य वस्तुनः उत्पत्तेः पूर्वं, नाशानन्तरं च भेदः कारणात्मना तिष्ठति इत्यङ्गीकरणेन अर्थात् सिद्धः समानन्यायत्वात् इति ज्ञेयम्।)

अथ प्रकृतमनुसरामः । मनोवृत्तिरूपज्ञानस्य स्वप्रकाशत्वे शङ्किते; तस्य जडत्वेन न तद्युक्तमिति टीकायाः वृत्तेः जन्यत्वेन स्वप्रकाशत्वनिराकरणपरतया पाण्डुरङ्गी आचार्यैः व्याख्यातम् । अस्य निरवद्यता विस्तरेण प्रत्यपादि । इतोऽपि तत्रैका संशीतिरूपजायते जडत्वेनेत्यस्य स्वरससिद्धः अप्रकाशत्वरूपः अप्रमातृत्वरूपो वाऽर्थः कुतो न स्वीकृतः ? इति । तत्रायं समाधिः - जडत्वेन = अप्रमातृत्वेन, अप्रकाशत्वेन वा स्वप्रकाशत्वाभावस्य साधने, प्रतिपक्षी स्वप्रकाशत्वं वृत्तेरङ्गीकुर्वाणः न अप्रमातृत्वमप्रकाशत्वं वाऽङ्गीकरोतीति तदपि साधनीयं भवति । वस्तुतस्तु वृत्तिज्ञानस्य 'घटः प्रकाशते' इति व्यवहारानुरोधेन प्रकाशरूपताभ्युपगमात्, अप्रमातृत्वमेव तदिति वक्तव्यम् । तदपि प्रतिवादिनं प्रति साधनीयमिति तत्पक्षं परित्यज्य, जडत्वेन = जन्यत्वेन तादृशज्ञानस्य स्वप्रकाशत्वं निराकृतम् । सुधायामपि 'कर्तृकर्मव्यपदेशाच्च' इति सूत्रव्याख्यावसरे त्रिपुटीप्रत्यक्षवादिभिः ज्ञानस्यैव स्वप्रकाशत्वे पूर्वपक्षिते, जन्यत्वेनैव हेतुना तत् पराकृतम् । तदनुरुद्ध्य अत्रापि स एव हेतुरादृत इति बोध्यम् ।

पूज्यैः श्रीव्यासतत्वज्ञतीर्थैः स्वप्रकाशत्वं = स्वकर्मकापरोक्षत्वम् इत्युक्त्वा, जडत्वेन प्रसिद्धेनैव हेतुना तदभावः साधितः। जन्यत्वेन साधनं तु जडत्वशब्दस्य प्रसिद्धार्थत्यागेऽपि सुधानुसारि साधु मार्गान्तरमित्यलं बहुना ॥

अत्र प्रतिविमर्शः -

यदुक्तं न वयं ज्ञानसामान्यस्य क्रियारूपत्वेन कारकसापेक्षतां ब्रूमः, अपि तु प्रत्यक्षज्ञाने एव । इत्यादिना केशवभट्टारकैः टीकायाः आशयो वर्णितः' इत्यन्तेन । तदत्यन्तमस्वरसम् ॥ ज्ञानं खलु ज्ञातैकतत् । अज्ञायमानं ज्ञानं न तिष्ठतीत्यर्थः। अयं च सर्वेषा-

मनुभवसिद्धः विचारः। एवं च ज्ञानस्य स्वप्रकाशत्ववादिना पूर्वपक्षिणा ज्ञानस्य स्वकर्मकत्वेऽपि कर्मजन्यत्वं नांगीकृतम् साक्षिवत्। एवं च वृत्तिज्ञानस्य स्वविषयत्वेऽपि स्वपूर्ववृत्तित्वानांगीकारात् कथमात्माश्रत्वापादनम् । एतदपेक्षयैव ऐजी आचार्यैः भविष्यत इव अकारणत्वेऽपि कर्मकारकत्वोपपत्तेः इत्युक्तम् ।

पाण्डुरंगीव्याख्याने दोषाभिधानम् -

किञ्च श्री ऐजी आचार्यैस्तु ज्ञानसामान्यस्य स्वप्रकाशत्वं स्यादिति बोधकं वाक्यमिति मत्वैव श्रीपाण्डुरङ्गीआचार्याणामुपरि दोषोऽभिहितः। 'भविष्यत इव अकारणत्वेऽपि कर्मकारकत्वोपपत्तेः' इत्यादिना। तस्यार्थस्तु 'जडत्वेन' इत्यस्य 'जन्यत्वेन' इत्यर्थकरणे भविष्यतः घटादेः इदानीमभावेऽपि घटं करोति घटं जनयति इतिवत् कर्मकारकत्वं युज्यत इति । तथा च श्रीपाण्डुरङ्गी आचार्यकृतस्य 'जडत्वेन' इत्यस्य 'जन्यत्वेन' इत्यर्थकरणं नैव सम्यगिति एको दोषः।

पाण्डुरंगीव्याख्यानं मूलटीकाननुगुणम् -

किञ्च इतोऽपि जन्यत्वरूपार्थः जडत्वस्य न घटते इति वदामि। टीकाकृत्पादानां जडत्वेन स्वप्रकाशत्वं व्यासेधता यज्जडव्यावृत्तं तदिह विवक्षितम् । तच्च स्वप्रमातृत्वम् जडत्वस्याप्रमातृत्वरूपत्वात् । तथा च जडत्वं नाम अप्रमातृत्वमेवार्थः करणीयः । एवं च 'मनोवृत्तिज्ञानं, न स्वप्रकाशम्, अप्रमातृत्वात् । यथा घटः' इति युक्तिः भवति इति श्रीऐजी आचार्याणां जडत्वेन इति पदस्य मुख्यं व्याख्यानं स्वारसिकमिति सम्यग् ज्ञायते । अयं चार्थः टीकानुगुणः, श्रीमदाचार्यवाक्यानुगुणश्च भवति । 'जडत्वं चाप्रमातृत्वमेव' इति आचार्यपादैरभिहितं तत्वोद्योतग्रन्थे । तदानु-

गुण्येन च श्री ऐजी आचार्याणां व्याख्यानम् अत्यन्तसमञ्जसमिति ज्ञायते । एतद्विहाय श्री पाण्डुरङ्गी आचार्याणां जन्यत्वपरव्याख्यानं श्रीमदाचार्यवाक्यानुगुणं च न भवतीति द्वितीयो दोषः इति स्पष्टं ज्ञायते ।

अथ विमर्शग्रन्थे **'ननु मानसप्रत्यक्षं हि तादृशमित्यादिना तादात्म्यस्य कारणात्मनाऽवस्थानं समानन्यायत्वादिति ज्ञेयम्'** इति पर्यन्तं तादात्म्यस्य सन्निकर्षत्वमङ्गीकृत्य तन्निरासकरणं च प्रकृतेऽनुपपन्नमेव भवति। स्वप्रकाशत्ववादे सन्निकर्षस्यानपेक्षणात्। ज्ञानसामान्यस्यैव स्वप्रकाशत्वं स्यादित्यस्य च प्रक्रान्तत्वाच्च।

एतेन **'अप्रमातृत्वरूपोऽर्थः कुतो न स्वीकृतः तत्रायं समाधिः। जडत्वेन=अप्रमातृत्वेन, अप्रकाशत्वेन वा स्वप्रकाशत्वाभावस्य साधने, 'प्रतिपक्षी स्वप्रकाशत्वं वृत्तेरङ्गीकुर्वाणः न अप्रमातृत्वमप्रकाशत्वं वाऽङ्गीकरोतीति तदपि साधनीयं भवति। वस्तुतस्तु वृत्तिज्ञानस्य 'घटः प्रकाशते' इति व्यवहारानुरोधेन प्रका-शरूपताभ्युपगमात्, अप्रमातृत्वमेव तदिति वक्तव्यम् । तदापि प्रतिवादिनं प्रतिसाधनीयमिति तत्पक्षं परित्यज्य जडत्वेन = जन्यत्वेन तादृशज्ञानस्य स्वप्रकाशत्वं निराकृतम्'** (वि.१६-१७पृ) इति तदपि निरस्तं वेदितव्यम् । कुतः ? इति चेत् - वृत्तिरूपं ज्ञानम् अन्तःकरणस्य परिणामविशेषः। अन्तःकरणं च जडरूपम्। अत एव अप्रमातृ । एवं च तत्परिणामविशेषाय वृत्तेरपि अप्रमातृत्वमवश्यम् अङ्गीकरणीयम् । नहि स्वविषयत्वमात्रेण प्रमातृत्वम् । 'शब्दः गुणः' इति वाक्यस्यापि स्वविषयत्वात् ।

सिद्धान्तमण्डनसंदर्भे गौरवं न दोषाय -

जडत्वस्य जन्यत्वपरव्याख्यानं 'जडत्वं चाप्रमातृत्वमेव' इति आचार्यवाक्याननुगुणं, टीका असाङ्गत्योपेतं चेति उक्तम् । अगत्या

प्रतिवादिनं प्रति (प्राभाकरं प्रति) जडत्वस्य अप्रमातृत्वसाधनं कृत्वा ततोऽन्तः करणवृत्तेः स्वविषयत्वाभावसाधनं कार्यमेव। आचार्यवचनानुरोधेन, टीकाकृत्पादानां वचनानुरोधेन च सिद्धान्त-स्थापनसन्दर्भे नैव गौरवादिकं भवति । यतो हि पूर्वपक्षी यद्यदा-काङ्क्षते तत्सर्वस्यापि उत्तरदाने सति निराकृतो भवति। तावत्पर्यन्तं विचारः मण्डयितव्य एव भवति । एतदनुरुद्ध्यैव श्री ऐजी आचार्यैः पूर्वपक्षिणं प्रति अप्रमातृत्वसाधनं अप्रमातृत्वरूपमेव साधनं कृतं वर्तते । तत्र हि अप्रमातृत्वमेव स्वप्रकाशत्वम्' इति जडत्वव्यावृत्तं च साधितं वर्तते । पूज्यैः श्री ऐजी आचार्यैः स्वकीय-व्याख्याने 'अत्रेयमाशङ्का' इत्यादिना' 'न काप्यनुपपत्तिः' इति पर्यन्तं कृतं च वर्तते । तथाहि - जडत्वेनेति ।। अत्रेयमाशङ्का। किं जडत्वं स्वप्रकाशत्वविरोधीति तत्त्वात्तदभावः उतास्वप्रका-शत्वव्याप्यमिति तत्त्वात्तत्वमिति । आद्ये किं विरोधः सहानवस्था-नलक्षण उत भावाभावलक्षण आहोस्वित् वध्यघातकभावलक्षण । नाद्यः। जडेप्यालोके स्वप्रकाशत्वदर्शनात् । न च स्वविषयत्वं स्वप्रकाशत्वम् । स्वविषयप्रकाशत्वं स्वप्रकाशत्वमिति स्वमतेऽङ्गी-कारात् इति टीकोक्तेः । जडे त्वालोकादौ प्रकाशान्तरानपेक्षत्वरू-पस्वप्रकाशत्वसत्वेऽपीच्छादिवत् सविषयकपदार्थत्वाभावेन विषय-विषयीभावगर्भस्वविषयत्वासंभवः इति वाच्यम्। अनुप्रमाणाण-स्यापि साक्षात्स्वजन्यप्रमाविषयविषयकत्वस्य अन्यत्र समर्थितत्त्वेन आप्तवाक्यं शब्दः इत्यादिशब्दे सामान्यसाध(ध्यक) के विशेषे लिङ्गे, ज्ञानसामान्यविषयकानुमितिशाब्दादिरूपे मानसज्ञाने च जडे स्वविषयकत्वदर्शनेन तन्नियमाभावात् । न द्वितीयः। सत्वासत्वा-दिवत् परस्परविरहरूपत्वाभावात् । जडेऽपि स्वप्रकाशत्वोप-पादनेन परस्परविरहव्याप्यत्वस्याप्यभावाच्च। नापि तृतीयः। नाजात

एकोऽन्यं हन्ति नाप्यन्याधारः इति न्यायेन सहावस्था-नस्यैव प्राप्त्या तेन तन्निषेधायोगात् । नान्त्यः । उक्तभङ्ग्या बहुस्थलेषु व्यभिचारदर्शनेन जडत्वस्याप्रकाशत्वेन व्याप्त्यसिद्धेः ।। जडत्वेऽपि स्वप्रकाशत्वोपपत्या विपक्षे बाधकाभावात् अप्रयोजक-त्वाच्चेति ।। अत्रेदं समाधीयते । जडत्वेन स्वप्रकाशत्वं व्यासेधता यज्जडव्यावृत्तं तदिह विवक्षितम् । न स्वविषयत्वमात्रम् । तच्च स्वप्रमातृत्वम्। जडत्वस्याप्रमातृत्वरूपत्वात् । यथोक्तमन्यत्र जडत्वं चाप्रमातृत्वमेव इति । तथा चाप्रमातृत्वेन स्वप्रमातृत्वाभावसाधनं युक्तम् । सामान्याभावस्य विशेषाभावव्याप्यत्वेन तेन तत्साधनसौलभ्यात् । इत्थं च मनोवृत्तिः, न स्वप्रमात्री, अप्रमातृत्वात् यदेवं तदेवं यथा घट इति युक्तेरभिप्रेतत्वात् न काप्यनुपपत्तिरिति।' (ल.प्र.१६३,१६४)

किंच अप्रमातृत्वरूपोऽर्थः स्वरससिद्ध इति भवद्भिरपि **"इतोऽपि तत्रैका संशीतिरुपजायते जडत्वेनेत्यस्य स्वरससिद्धः अप्रकाशत्वरूपः अप्रमातृत्वरूपो वाऽर्थः कुतो वा न स्वीकृतः ?"** इत्यादिना अङ्गीकृतश्च । अतो पाण्डुरङ्गी आचार्याणां व्याख्या-नम् टीकाननुगुणं, टीका असाङ्गत्योपेतं, श्रीमदाचार्यानभिलषितं चेत्यकामेनापि अङ्गीक्रियते ।

इदन्त्ववधेयम् - द्वैतसिद्धान्ते श्रीमद्भिः ऐजी आचार्यैः स्वप्रकाशत्वलक्षणद्वयमभिहितम् अस्मिन्नेव सन्दर्भे इति उपर्युक्तस्य विवरणं वदामि। तत्राद्यं स्वविषयप्रकाशत्वं स्वप्रकाशत्वमिति। एवमुक्तौ जडसाधारणं भवतीति मत्वा महता प्रयत्नेन 'अत्रेदं समाधीयते । जडत्वेन स्वप्रकाशत्वं व्यासेधता जडव्यावृत्तं तदिह विवक्षितम् । न स्वविषयत्वमात्रम् । तच्च स्वप्रमातृत्वम् । जडत्व-स्याप्रमातृत्वरूपत्वात् । यथोक्तमन्यत्र 'जडत्वं चाप्रमातृत्वमेव' इति उक्त्वा वस्तुतस्तु प्रवर्तकज्ञानविषयकत्वं च यादृशं साक्षिणस्तादृशं

प्रवर्तकज्ञानस्य शङ्कनीयम्। तच्च ज्ञात्रादिव्यवहारनिर्वाहकम् विशिष्यस्वकर्मकापरोक्षत्वम् । एतच्च न क्वापि जडे सम्मतम् इति पर्यन्तं टीकाचार्यभिलषितं जडत्वव्यावृत्तं स्वप्रकाशत्वलक्षण-मभिहितम् । 'ज्ञानं गुणः' इति शाब्दज्ञाने अनुमित्यात्मकज्ञाने च (गुणत्वेन ज्ञानस्य) सामान्यतः स्वगतपरोक्षविषयताकत्वस्य सत्वेऽपि स्वकर्मकापरोक्षत्वं नास्तीति न कुत्राप्यतिप्रसक्त्यादिरिति। 'मनोवृत्तिः, न स्वप्रमात्री, अप्रमातृत्वात् यदेवं तदेवं यथा घटः' इत्युक्तेरभिधानात् 'जडत्वेन' इत्यस्य 'अप्रमातृत्वेन' इत्यर्थकरणं तादृशजडस्य स्वप्रकाशत्वनिराकरणपरव्याख्यानम् अत्यन्तसङ्गतं चेत्यकामेनापि अङ्गीक्रियते । एतादृशानां टीकामर्मप्रकाशनसिद्ध-हस्तानाम् ऐजी आचार्याणां प्रकटीकृतटीकोक्तिमहिमा अनितरसा-धारणमिति विभावनीयम् ।

सुधोक्तमपि भवतां न सानुकूलमिति समर्थनम् -

किञ्च यदुक्तम् सर्वगतत्वाधिकरणीय **'सुधायामपि कर्तृकर्मव्यपदेशाच्चेति** (ब्र.सु.१-२-१-३) **सूत्रव्याख्यावसरे त्रिपुटीप्रत्यक्षवादिभिः ज्ञानस्यैव स्वप्रकाशत्वे पूर्वपक्षिते जन्यत्वेनैव हेतुना तत् पराकृतम् । तदनुरुध्य अत्रापि स एव हेतुरादृत इति बोध्यम्' इत्यादि । एतदप्यसाधु** ।। तत्रापि सुधायां प्राभाकरैः आत्मनः कर्मत्वाभावेऽपि आत्मविषयत्वं कथं भवतीति ज्ञानविषये एव स्वप्रकाशत्वशङ्का कृता इति तत्रस्थातिदेशो न कर्तुं शक्यः । भिन्नविषयत्वात् । प्राभाकरमतनिरासकसन्दर्भश्च सुधायां प्रक्रान्तः। तथाहि - यादुपत्ये च **प्राभाकरोक्तम् आत्मनोऽकर्मत्वेऽप्य परोक्षत्वोपपादनं दूषयितुमनुवदति अपर आहेति।। इति** । एवमेव सुधाव्याख्यायां वाक्यार्थचन्द्रिकायां च **'त्रिपुटीप्रत्यक्षवादिना प्राभाकरेणात्मनो अकर्मत्वेऽप्युक्तं स्वप्रकाशसंविदाश्रयत्वेन**

प्रत्यक्षत्वोपपादनप्रकारं दूषयितुमनुवदति अपरस्त्विति ।। 'इति च अवतारिकायां ज्ञानस्यात्मविषयत्वनिराकरणप्रश्नः इति स्पष्टतया ज्ञायते । तथा च ज्ञानस्यात्मविषयकत्वनिराकरणप्रसंगः प्रकृतानुपयुक्तः। तत्र प्राभाकरमतं दूषयितुं नानाविधानि स्वप्रकाशत्वलक्षणानि टीकाकृद्भिरभिहितानि वर्तन्ते।

तत्र प्रथमं स्वकर्मकप्रकाशत्वम् स्वप्रकाशत्वं इति चेत् तत्र एकस्यैव कर्मकर्तृभावविरोधं परिहर्तुं क्रियाकर्मभावमभ्युपैति । तत्कथमिति चेत् इत्थम् - ज्ञानं प्रकाशरूपम् इत्युक्तौ प्रकाशस्य क्रियात्वात् ज्ञानं क्रियारूपमिति आसीत् । तत्प्रकाशस्य स्वकर्मत्वे तस्यैव ज्ञानस्य क्रियात्वं कर्मत्वं चागतम् । तच्च विरुद्धम् । यतो हि कर्म क्रियाजनकम् । क्रिया च कर्मजन्या । जन्यजनकयोरेकता नास्ति । पूर्वापरभावित्वात् इति तन्मतनिराकरणम् । ततः प्रकाशान्तरानपेक्षसिद्धत्वं स्वप्रकाशत्वम्, स्वातिरिक्तप्रकाशानपेक्षसिद्धत्वं,स्वव्यवहारहेतुप्रकाशकत्वम् इत्यादि लक्षणान्याशङ्क्य निराकृतं वर्तते । न केवलं जन्यत्वमात्रहेतुना । तथा च 'जन्यत्वेनैव हेतुना तत्पराकृतम्' इत्येवकारघटिततया विमर्शकारैरभिहितं निरस्तम् । हेत्वन्तराणां सत्वात् ।

अत्र प्रकृतमनुसरामः-'स्वन्यायैः साधनं कार्यम्, परन्यायैस्तु दूषणम्' इति अनुव्याख्यानोक्तरीत्या तत्र सुधायां परन्यायेन स्वप्रकाशत्वलक्षणं निराकृतम्। विष्णुतत्त्वनिर्णये तु स्वप्रकाशत्वमङ्गीक्रियतामित्याशङ्कायाः तस्य जडत्वेन स्वप्रकाशत्वं नास्तीति निराकरणप्रघट्टिकायां स्वमतेन जडत्वव्यावृत्तः एव स्वप्रकाशत्वलक्षणमभिधानसन्दर्भः समागतः । अत एव महता प्रयत्नेन स्वप्रकाशत्वलक्षणं विमृश्य श्रीमध्वाचार्योक्तं श्रीटीकाकृद्भिरुक्तं च जडव्यावृत्तं स्वसिद्धान्तरहस्यं स्वकर्मकापरोक्षत्वमिति स्वप्रकाशत्वलक्षणमभिहितम् ऐजी आचार्यैः । तस्मात् तत्रोक्तः (सुधोक्तः) समाधानस्य अस्मिन् सन्दर्भे अतिदेशः अनुचितः । अतः जडत्वेन प्रसिद्धेनैव हेतुना स्वप्रकाशत्वाभावः साधितः ऐजीआचार्यैः। श्रीपाण्डुरङ्गी आचार्यैस्तु प्रसिद्धत्यागाप्रसिद्धस्वीकारश्च कृत इति सुहृद्भिरवलोकनीयमित्यलमतिविस्तरेण।।

***

षष्ठो भागः

श्रीमद्विष्णुतत्त्वनिर्णयः, टीका, व्याख्यानानि च -

मूलम् - कादाचित्कभ्रान्तिरेवादित्योदयादिदर्शनात् निवार्यते।

टीका - अनेन प्राच्यादिशब्दव्युत्पत्तौ आदित्योदयादीनामुपलक्षणत्वेन उपात्तत्वात् तदर्थमपि उपयोग इति सूचितम्। (वि.नि.टी.२१२ पृ)

पा.टि.- नन्वादित्योदयादिना प्राच्यादिशब्दव्युत्पत्तेरपि दर्शनेन तस्य व्युत्पत्तावप्युपयोगसिद्धेः 'कादाचित्कभ्रान्तिरेवादित्योदयादिदर्शनात् निवार्यते इति' दिगन्तरे दिगन्तरत्वभ्रममात्रनिवर्तकत्वाभिधानमादित्योदयादेरनुपपन्नम् इत्यत आह-अनेनेति।। अत्रानेन तदर्थमप्युपयोग इति सूचितमिति सम्बन्धः। अनेन = आदित्योदयादेः भ्रमनिवर्तकत्वकथनेन, तदर्थमपि = प्राच्यादिशब्दव्युत्पत्त्यर्थमपि उपयोग इति सूचितमित्यर्थः । न केवलं भ्रमनिवृत्त्यर्थम् अपि तु प्राच्यादिशब्दव्युत्पत्त्यर्थमपीति अपिशब्दार्थः । ननु 'कादाचित्क' इति मूले आदित्यदर्शनस्य भ्रमनिवृत्त्यर्थकत्वोक्तेस्तदर्थमुपयोगसूचनसम्भवेऽपि प्राच्यादिशब्दव्युत्पत्त्यर्थताया मूलेऽनुक्तेः न तदर्थतयोपयोगसूचनं सम्भवतीत्यत उक्तम्।। प्राच्यादिशब्दव्युत्पत्तावादित्योदयादीनामुपलक्षणत्वेनो-पात्तत्वात् इति। भ्रमनिवर्तकत्वेनादित्योदयादेः उपयोगकथनस्य आदित्योयादीनां प्राच्यादि

शब्दव्युत्पत्तौ उपयोगोपलक्षणत्वेन स्वीकारादित्यर्थः। अनेन भ्रान्तिर्निवार्यते इत्यत्र, भ्रान्तिपदेन लक्षणया प्राच्यादिशब्द-वाच्यत्वप्रमापरिग्रहः । 'निवार्यते' इत्यनेन लक्षणया भवतीति अर्थ-परिग्रहः । लक्षणाऽपि न जहत्स्वार्थ एवेति भावेनोपलक्षणपद-प्रयोगः । न च युगपदवृत्तिद्वयविरोधः । सिद्धान्ते तस्यादोषत्वा-दिति।। (पा.टि.२१६ पृ)

व्या.टि. - अधिकरणसिद्धान्तमाह - अनेनेति।। आदित्योद-यादेः भ्रान्तिनिरासोपयोगकथनेन इत्यर्थः । शब्दव्युत्पत्ताविति । दिगियं प्राचीशब्दवाच्या इत्यादिशब्दशक्तिप्रमायाम् इत्यर्थः। कथमुपपादनमित्यत आह उपलक्षणत्वेनेति।। संस्थानविशेषवि-शिष्टस्य देवदत्तगृहशब्दवाच्यत्वे काकादेरिव शक्यतानवच्छेदक-त्वेऽपि शक्तिनियतत्वेनोपात्तत्वादित्यर्थः । तदर्थमपि = शक्तिप्रमा-र्थमित्यर्थः शब्दशक्तिप्रमोपयोगाभावे तद्भ्रमनिरासासम्भवात्।

केचित्तु 'भ्रान्ति' पदेन प्रमाया, 'निवार्यते' इत्यनेन भवतीत्यस्य चोपलक्षणावृत्त्या ग्रहणेन शब्दव्युत्पत्तौ कारणतया आदित्योदयादिनामुपात्तत्वात् तदर्थमप्युपयोग इति सूचितम् इत्याहुः । तन्न स्वरसम् । उपलक्षणावृत्तिमत्पदस्य भ्रान्तिरित्यस्य, निवार्यते इत्यस्य चाग्रहणात् । उपलक्षणीयस्यापि प्रमाभवनादेरनुक्तेः । व्युत्पत्तावित्यादेर्यथाप्रतीतान्वयसम्भवे त्यागायोगाच्च।उपलक्षणावृत्या ग्रहणे सूचितमित्ययोगाच्च ।।

अत्र विमर्शः -

अत्र गुरुराजीयभावो वर्ण्यते - उपलक्षणपदं लक्षणावृत्तिमत् पदवाचकमिति सामान्यतः सकलतान्त्रिकतन्त्रप्रसिद्धिः । तदनुसारेण अस्य वाक्यस्याशयो विवृतः केशवभट्टारकैः । तथा च

आदित्योदयादीनां भ्रमनिवर्तकत्वकथनेन तादृशव्युत्पत्त्यर्थमपि तेषाम् उपयोग इति सूचितम् इत्युक्तौ, अत्र कथं सूचितम् ? लक्षणया चेत्, लाक्षणिकं पदं किम् ? इत्याकाङ्क्षानिवृत्त्यर्थम् उपलक्षणत्वेनोपात्तत्वात् इत्युक्तम् । कस्य इत्याकाङ्क्षानिवृत्त्यर्थमेव उपयोगरूपार्थसूचनार्थमेव श्रीमदाचार्यैः मूले उपात्तस्य 'भ्रान्तिर्निवार्यते' पदघटितस्य भ्रान्तिनिवारकत्वकथनस्य अध्याहारोऽत्र उपलक्षणत्वेनेत्यतः पूर्वं करणीयः ।यथोक्तमभियुक्तैः यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम् । वाक्यं वेति सतां नीतिः........... इति ।। तथा च मूलकारेण उपयोगरूपोंशः लक्षणया कीर्त्यते इति भावः टीकाया उक्तो भवति ।

वाक्यान्वयक्रमस्तु - प्राच्यादिशब्दव्युत्पत्तौ आदित्योदया-दीनाम् उपयोगोपलक्षणत्वेन तेषां भ्रान्तिनिवारकत्वकथनस्यो-पात्तत्वात्, भ्रान्तिनिवारकताकथनेन 'तदर्थमपि उपयोगः' इति सूचितमिति। एतन्मते क्लिष्टकल्पनारूपत्वेन भासमानेऽपि उपलक्षण मित्यस्य लक्षणावत् पदमिति प्रसिद्धार्थस्वीकारः उपात्तत्वादिति पदस्य सार्थक्यं च गुणः । अन्यथा भूतार्थे क्तप्रत्ययान्तस्य उपात्तशब्दस्यासङ्गत्यापत्तिः दुर्वारणा स्यात्। लक्षणावृत्त्या बोधि-तेऽर्थे 'सूचित' शब्दप्रयोगे सार्वजनीनोऽनुभव एव मानम् । इतरे दोषास्तु 'उपलक्षणशब्दस्य प्रसिद्धार्थतोपपत्त्यर्थं, उपात्तत्वपदस्वा-रस्याय च 'यत्रानवसरोन्यत्र' इत्याद्युक्तदिशा शास्त्रेऽस्मिन् प्रकरणे नैव लग्नतां भजन्ते इति गुरुराजोक्तमार्गः समीचीन एवेति मे मतम्। परप्रमेयन्तु लघुप्रभोक्तदोषाणामलग्नकतैव न तु दूषणम् । महान्तः सहृदयाः सन्तः दोषज्ञा एवात्र प्रमाणम् ।।

अत्र प्रतिविमर्शः -

सन्दर्भेऽस्मिन् विचार्यमाणे सति श्रीगुरुराजीयव्याख्याने क्लिष्टकल्पना अस्ति। तथाहिमूलस्थभ्रान्तिपदेन लक्षणया प्राच्यादि शब्दवाच्यत्वप्रमायाः निवार्यत इति पदेन भवतीत्यस्य च स्वीकृत्यार्थवर्णने क्लिष्टकल्पनाप्रसङ्गेति दोषः ।

टीकावाक्येनैव अभिमतार्थस्य लाभे 'भ्रान्ति-निवार्यत' पदयोः लक्षणाकरणमनावश्यकं गौरवं चेति एको दोषः । टीकावाक्येन चायमर्थः कथं लभ्यते ? इति चेदित्थम् - प्राच्यादिशब्दव्युत्पत्तौ = 'दिगियं प्राचीशब्दवाच्या इत्यादिशब्दशक्तिप्रमायामित्यर्थः। यतो हि व्युत्पत्तिशब्दस्यार्थः श्रीमट्टीकाकृत्पादैरेव न्यायसुधायां 'व्युत्पत्तिर्हि वाच्यवाचकसम्बन्धज्ञानम्' इति वर्णितः। तदनु-सारेण ऐजी आचार्यैः प्राच्यादिशब्दप्रमायामित्यर्थो वर्णितः । अत एव तदर्थमिति टीकास्थपदस्यापि शक्तिप्रमार्थमित्यर्थो वर्णितः । तच्छब्दस्य सर्वनामरूपत्वात् पूर्वं शक्तिप्रमायाश्च प्रसक्तत्वेन पूर्वपरामर्शकत्वं च सूपपन्नम् । इत्थं च अनेनेत्यादिटीकावाक्यस्य 'दिगियं प्राचीशब्दवाच्या' इत्यादिशब्दशक्तिप्रमायाम् आदित्योद-यादीनां दिगन्तरभ्रमनिवर्तकत्ववत् प्राच्यादिशब्दवाच्यत्वभ्रम-निवर्तकत्वमपि लभ्यत इति मूलवाक्यघटकपदसमुदायस्यार्थः इति टीकावाक्यस्य स्वारसिकोऽर्थः विना लक्षणां लभ्यते। एतादृशार्थ-करणे युक्तिश्चाभिहितः सा च शब्दशक्तिप्रमोपयोगाभावे तद्भ्रम-निरासः नैव सम्भवतीति । कथमित्युक्तौ आदित्योदयस्य स्वाधि-करणे प्राचीशब्दवाच्यत्वप्रमाद्वारा अन्यत्र व्यापकाभावरूपेण स्वाभावेन प्राचीशब्वाच्यत्वाभावप्रमाद्वारा तच्छब्दवाच्यत्वभ्रान्ति-निवर्तकत्वं वक्तव्यम् । तच्च वाच्यत्वप्रमोपयोगं विनाऽनुपपन्नम्। अतः प्राचीशब्दवाच्यत्वभ्रमनिरासकत्वेन तत्प्रमोपयोगसूचनम्।

टीकावाक्येन यथाप्रतीतान्वयसम्भवे तत्त्यागे कारणानाभिधानाच्च इत्यपरो दोषः लगत्येव । युगपद्वृत्तिद्वयविरोधस्य सिद्धान्तेऽदोषत्वेऽपि तस्योपस्थापनम् अनवसरम् अप्रकृतं चेति अन्यो दोषः ।

उभयपक्षे गुणदोषचिन्ता -

किञ्च टीकावाक्यस्यायमाशय भवति गुरुराजीयव्याख्यानपक्षे प्राच्यादिशब्दव्युत्पत्तौ आदित्योदयादीनामुपलक्षणत्वेनोपात्तत्वात् प्राच्यादिशब्दव्युत्पत्यर्थमपि उपयोगः इति ।

एवमैजी आचार्यव्याख्यानपक्षे तु दिगियं प्राचीशब्दवाच्या इत्यादिशब्दशक्तिप्रमायाम् आदित्योदयादीनामुपलक्षणत्वेनो-पात्तत्वात् शक्तिप्रमार्थमपि उपयोग इति । न केवलं दिगन्तर-भ्रमनिवर्तकत्वम्, अपि तु शक्तिप्रमार्थमपि इति । अनयोः आशययोः अन्तिमतात्पर्यस्यैकत्वेऽपि तौलनिकाध्ययनकरणेन लाघवगौ-रवचिन्तायाः दोषसत्वासत्वचिन्तायाश्च मूलटीकानुगुणाननुगुण-चिन्तायाः, स्वारसिकत्वतदभावचिन्तायाश्च करणेन च प्रतिविमर्शः करणीयः ।

किञ्च 'अनेन' इत्यादिटीकावाक्येन लब्धस्य स्वारसिकस्य अर्थस्य उपरिप्रदर्शितस्य च यथा प्रतीतान्वयसम्भवे सति तत्त्यागे कारणं नास्तीत्यपरो दोषः ।

किञ्च गौरवरूपदोषसत्वादेव पुनर्गौरवरूपदोषोऽपि अभिधातुं शक्यते श्रीपाण्डुरङ्गीआचार्यव्याख्याने। तथाहिअनुक्तांशता परिहाराय मूलस्थपदद्वयलक्षणा कृत्वा तत्समर्थनाय अर्थात् 'सिद्धान्ते पदद्वयलक्षणां कर्तुं शक्यते' इत्यधिकतया वृत्तिद्वयपरि-हारोपस्थापनम्, अनवसरम्, अप्रकृतं चेति अन्यो दोषः।

अथ च ऐजीआचार्याणां व्याख्याने 'अनेन' इत्यादि टीकावाक्येनैव अभिमतार्थसिद्धौ स्वारसिकार्थस्य च सिद्धौ सत्याम् अनुक्तांशता नास्ति इत्येको गुणः।

ऐजीआचार्याणां व्याख्याने अनुक्तांशताशङ्का, तन्निरासश्च -

ऐजी आचार्याणां व्याख्यानेऽपि अनुक्तांशता कुतो वा नास्ति? यतो हि प्राच्यादिशब्दवाच्यत्वभ्रमनिरासकत्वं मूले नोक्तं खलु इति चेन्न । प्राच्यादिशब्दवाच्यत्वभ्रमनिरासकत्वं मूलेऽपि उक्तमिति टीकाकृत्पादानां दिगन्तरे दिगन्तरभ्रमस्य तद्विषयत्वात् इति उत्तरटीकावाक्येन ज्ञायते । तथाहि **ननु शब्दवाच्यत्वभ्रमनिरासकत्वं नोक्तम् । किन्तु दिगन्तरत्वभ्रमनिवर्तकत्वमेवेत्यत आह - दिगन्तर इति ।। तद्विषयत्वात् = दिगन्तरत्वविषयत्ववत् शब्दवाच्यत्वविषयत्वात् ।** तथा च वाच्यत्वभ्रमनिरासकत्वमपि अभिहितम् । अतो न अनुक्तांशतारूपदोष इति विभावनीयम् । गौरवादिदोषाश्च न सन्ति । टीकागतपदानामेवार्थोपवर्णनेन च टीकानुगुण्यं सम्पादितमिति अपरो गुणः ।

किञ्च शब्दशक्तिप्रमोपयोगाभावे तद्भ्रमनिरासः न सम्भवतीति दृष्टान्तप्रदर्शनमुखेन प्रतिपादितमैजीआचार्यैः ।

अथ च भ्रान्तिरेवेत्यादि आचार्यवचनस्य तात्पर्यमपि व्याख्यातमैजीआचार्यैः। तथा हि - 'भ्रान्तिरेव' इत्यत्रावधारणार्थक-एवकारेण अन्यत्रोपयोगाभावः सूचितः । प्रकृते च प्रमायामप्युपयोगसूचने व्याघातो भवतीति चेन्न । सामान्यविशेषस्वरूपप्रतीतावुपयोगस्यानभिमतत्वेन तन्मात्रव्यावर्तकत्वं तस्येति। प्रकृते दिक्सामान्यविशेषस्वरूपप्रतीतौ उपयोगस्य अनभिमतत्वात् उपयोगसूचनेऽपि न व्याघातः' इत्यादिना एवकारस्वारस्यमभ्यभिहितम् ।

वस्तुतस्तु 'दिक्स्वरूपं साक्षिसिद्धम्' इति कृत्वा दिक्स्वरूपविषये न भ्रान्तिः। अत एव टीकायां दिगन्तरे दिगन्तरभ्रमः उक्तः। कादाचित्कभ्रान्तिः इत्यादि मूलमभ्युपेत्यवादेन प्रवृत्तमिति सर्वेषामभिप्रायः ।

यदुक्तं उपात्तत्वादितिपदस्य सार्थक्यं गुण इति, तदस्मन्मतेऽपि गुणः। भ्रान्तिनिवर्तकत्वं मूले उक्तम्। तेन आदित्योदयस्य प्रच्यादिशब्दव्युत्पत्तौ हेतुत्वमुपादीयत इति स्वरस एवार्थः। भूतार्थक्तप्रत्ययश्च सुष्ठु उपपद्यते ।

टीकास्थसूचितपदस्वारस्यकथनम् -

किञ्च उपलक्षणपदं लक्षणावृत्तिपदवाचकमिति उपलक्षणावृत्त्या ग्रहणे सूचितमिति 'अयोगाच्च' इत्यनेन अन्योऽपि दोषो अभिहितः। पदद्वयलणाकरणेनैव बोधसम्भवे सूचितमिति पदमनुपपन्नं भवतीति तेषामाशयः। अस्तु, भवतामपि अयं दोषः भवति इति चेन्न। आदित्योदयात् प्राच्यादिशब्दवाच्यत्वप्रमारूपार्थः उपलक्षणवृत्त्या विना सूचित इत्येवाभिप्रायः व्यक्तो भवति ऐजी-आचार्याणां व्याख्याने । परं पाण्डुरङ्गी आचार्याणां व्याख्याने तु नैवम् । पदद्वयलणावृत्त्या बोधितः अर्थः पुनः सूचितो भवतीति अभिप्रायः व्यक्तो भवतीति सूचितपदस्य अनुपपत्तिः प्रतिपादिता ।

इत्थं चायं समुदायार्थः- भ्रान्तिरित्यनेन प्रमायाः, निवार्यत इत्यनेन भवतीत्यर्थस्य च टीकाकारैरग्रहणादिति एको दोषः। उपलक्षणीयस्य प्रमाभवनादेः मूलानुक्तिरूपदोषः इत्यपरः। मूलानुक्तिरूपदोषपरिहाराय पदद्वयलक्षणाकरणे महागौरवं च। एवम् उत्पत्तावित्यादेः यथा प्रतीतावन्वयसम्भवे त्यागायोगाच्चेति अन्यो दोषः। लक्षणावृत्त्या ग्रहणे सूचितमिति पदस्यानुपपत्तिरूपदोषश्चेति

श्रीव्यासतत्वज्ञतीर्थैरभिहिताः दोषाः श्रीपाण्डुरङ्गीआचार्याणां व्याख्याने संलगन्त्येवेति सुदृढो निश्चयः इति।। शम् ।। शम् ।। शम् ।।

लघुप्रभाख्यव्याख्यायां टीकार्थो सुष्ठु दर्शितः ।
न कार्या ह्यत्र संशीतिः इति मे निश्चयो दृढः ।।
।।श्रीमध्वेशार्पणमस्तु।।

अन्वेषितग्रन्थसूची

१	श्रीमद्विष्णुतत्त्वविनिर्णयः श्रीजयतीर्थकृतटीकया तथा श्रीरघूत्तमतीर्थकृतभावबोधः श्रीराघवेन्द्रतीर्थकृतभावदीपः श्रीनिवासतीर्थकृतवाक्यदीपिका श्रीपाण्डुरंगीकेशवभट्टारकीय विषमपदवाक्यार्थविवृतिः श्रीव्यासतत्वज्ञतीर्थकृतलघुप्रभा इति पञ्चव्याख्याभिः सहितः	श्रीमन्मध्वराध्दान्तसंवर्धनी सभा, ३५-ए-गंगाधरेश्वर कोयिल् स्ट्रीट् मद्रपुरी (सम्पादकाः) श्री.पि.पि. लक्ष्मीनारायणोपाध्यायः मद्रपुरीसंस्कृतमहापाठशाला	१९६१
२	श्रीमन्न्यायसुधा परिमलाद्युपेता	श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम् श्रीराघवेन्द्रस्वामिमठः मन्त्रालयः	२००३
३	दशप्रकरणानि (III भागः) तत्वोद्योतः द्वैतद्युमण्यादिव्याख्योपेतः,	संशोधकाः श्री.पि. पि.लक्ष्मीनारायणोपाध्यायः मद्रपुरीसंस्कृतमहापाठशाला	१९७१
४	तर्कताण्डवम् (न्यायदीपसहितं)	ORI - Mysore	
५	सिद्धान्तकौमुदी	भट्टोजीदीक्षितविरचिता	
६	पदमञ्जरी	श्रीहरदत्तकृता	
७	स्वर्णनिकषः(कुम्भकोणम् आनन्दतीर्थाचार्यकृतः)	हरिदासभट्टैःसंपादितः श्रीगुरुसार्वभौमसंशोधनमन्दिरम् मन्त्रालयः	२०१९
८	काशिकावृत्तिः		
९	गीताभाष्यम् (टीकाटिप्पणीसहितम्)	पूर्णप्रज्ञसंशोधनमन्दिरम् बेंगलूरु	१९९८

परिशिष्टभागः

॥ श्रीः ॥

॥ विमर्शः ॥

(विष्णुतत्वनिर्णयटीकागुरुराजीयटिप्पण्याः आर्जवसम्पादनम्)

-रचयिता-

वीरनारायणः पाण्डुरङ्गी

-सहलेखकः-

श्रीनिवासः वरखेडी

श्रीविद्याधीशशोधसंस्था

हुब्बली - बेङ्गलूरु

-श्रीगुरुराजो विजयते-

सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥
यस्मिन् विद्याप्रचण्डाः स्फुरदसिसमसन्मानसा वीतरागाः
हंसा हंसादिविद्याः श्रुतिनिगमपरा मध्वशास्त्रावमर्शाः ।
नित्यं नित्यं रमन्ते क्वचिदपि न परां तृप्तिमन्ते लभन्ते,
श्रीशं वन्दे मुकुन्दं श्रुतिततिनिगमैः मुख्यवृत्त्यैव वाच्यम् ॥
कुवादिमायिदुर्मेघाः निरस्ता हि यदागमात् ।
तं मध्वं मारुतं नौमि मन्त्रवेद्यं महत्तमम् ॥
यद्वाक्यं कामधेनुर्नः कामितार्थं प्रयच्छति ।
टीकाकृतस्तु तान् स्तौमि जयार्यान् गूढभावकान् ॥
अर्थिकल्पितकल्पोऽयं प्रत्यर्थिगजकेसरी।
व्यासतीर्थगुरूर्भूयाद् अस्मदिष्टार्थसिद्धये ॥
यदनुग्रहमात्रेण मूको वाचस्पतीयति ।
भावबोधकृतं श्रीमद्रघूत्तमगुरूं भजे ॥
यद्विद्याधीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥
प्रकटीकृतटीकोक्तिः मर्कटीकृतमायिराट् ॥
चर्कृताद् व्यासतत्त्वज्ञमस्करीन्द्रः कृपां मयि ॥
सुधामधुरसाकीर्णमनुव्याख्याप्रियाननम् ।
मुहुश्चुम्बन्मधुकरो विश्वेशाख्यो जयी यतिः ॥
गुरूराजगुरूः पातु शेषवाक्यर्थचन्द्रिका ।
येनाकारि गुरोराज्ञाभारेणैव न मत्सरात् ॥

टीका-(पृ १७) विघ्नविघातादिसाधनतयाऽविगीतशिष्याचारपरम्परा-प्राप्तं नारायणवन्दनं स्वयमन्तरायविधुरोऽपि भगवानानन्दतीर्थमुनिः शिष्यान् ग्राहयितुं प्रकरणादौ निबध्नाति - इत्यादिः ।

पां.टि.-(पृ.२३) यद्यपि ग्रन्थकृन्मते 'प्रमाणिकत्वाच्चास्यार्थस्य' इत्युत्तरग्रन्थपर्यालोचनया, मङ्गलस्य समाप्ति फलकत्वव्युत्पादनपर -

जिज्ञासासूत्रीयसुधानुसाराच्च समाप्तेरेव मङ्गलफलत्वस्थित्या मङ्गलस्य विघ्नविघातादि फलकत्वाभावात् 'विघ्नविघातादिसाधनतया' इत्युक्तिरयुक्ता इत्याभाति । तथापि विघ्नविघातः, आदिः = कारणं यस्या सा विघ्नविघातादिरिति विग्रहाश्रयणात् विघ्नविघातादिपदेन समाप्तेरेव ग्रहणात् अदोष इति ज्ञेयम् ॥

व्या.टि.-(पृ.३०) विघ्नन्ति इति विघ्नाः = प्रतिबन्धकाः, तेषां विघातः = प्रतिहतिः । आदिना समाप्ति - प्रचयादि । केचित्तु - विघ्नविघात एवादिः कारणं यस्याः समाप्तेः तत्साधनतया इत्यर्थ इत्याहुः । तदसत्; विघ्नाभावकारणत्वे, 'उत्सर्गापवादौ क्वापि न स्यातामित्युत्तरटीकाविरोधात्। शब्देनैव प्रचयग्रहणसौलभ्ये उपलक्षणकरणासम्भवाच्च'। इति ॥

विमर्शः- अत्रेदं विचारणीयं तत्त्वम्- न हि तत्र पाण्डुरङ्गीय - टिप्पण्यां विघ्नाभावस्य समाप्तौ कारणत्वमुक्तं, येन टीकाविरोधः शङ्क्येत । अपि तु प्रयोजकत्वमेव ॥ विघ्नाभावस्य कारणत्वे एव श्रीव्यासतत्त्वज्ञतीर्थैर्वर्णितो दोषः लगति नान्यथा । तथा हि विघ्नाभावरूपः प्रतिबन्धकाभावः यदि कारणकोटौ निवेश्यते; तदा यत्रासमाप्तं कर्म, तत्र विघ्नाभावरूपकारणाभावादेव कार्यानुत्पत्त्युपपत्तेः 'समाप्यते' इत्युत्सर्गः, 'विघ्नसत्त्वेने'ति अपवादश्च न घटेयाताम् । परं, मङ्गलजन्यः विघ्नध्वंसः समाप्तौ व्यापारमुद्रया प्रयोजक इत्यङ्गीक्रियते । इत्थं च नोत्सर्गापवादोच्छित्तिः । यद्यपि व्यापारत्वं जनकत्वरुपमेव; तथापि यत्र प्रतिबन्धकाभावस्य व्यापारता प्रमिता तत्र प्रयोजकत्वमेव तत् । तदपि कारणतावच्छेदक - प्रतिबन्धकाभाव - कारणकारण (कुलालादि) साधारणमेव यथा - "स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने" इत्यत्र गीताभाष्यटीकायां

धर्मस्य अन्तःकरणमलनाशद्वारा मोक्षसाधनताकथनावसरे प्रतिबन्धकीभूत अन्तःकरणमलनाशस्य द्वारत्वमुररीकृतम् ।

अपि च प्रतिबन्धकाभावादेः प्रयोजकत्वं तर्कताण्डवे प्रमायां दोषाभावस्य हेतुत्वभङ्गे स्वीकृतम् ; कारणत्वमात्रं दूषितम् । एवं, अदुष्टमिन्द्रियन्त्वक्षमित्यादौ ब्रह्मतर्के प्रमाणलक्षणे च दोषाभावस्य कारणत्वाभावेऽपि प्रयोजकत्वमङ्गीकृतम् । प्रयोजकेऽपि कारणशब्द-प्रयोगः दृष्टः । दोषाभावस्य कारणत्वेऽपि (प्रयोजकत्वेऽपीत्यर्थः-ताण्डव प्रकाशः) नास्माकमनिष्टमिति च भाष्यटीकोक्तेः । एवं च प्रकृतेऽपि गुरुराजीये कारणशब्दः प्रयोजकपरः इति तस्य कारणत्वार्थकत्वप्रयुक्तो दोषः दूरे तिष्ठति ॥

किञ्चात्र एवमपि विभाव्यते - अव्यवहितपूर्वत्वसम्बन्धेन विघ्नाभावविशिबलवन्मङ्गलमेव कारणमित्यपि सुवचत्वेन, विघ्नाभावस्य कारणतावच्छेदकविधया प्रयोजकत्वमिति न काचिदनुपपत्तिः इति ॥

अथ शब्देनैव प्रचयग्रहणसौलभ्ये उपलक्षणकरणासम्भवाच्चेति द्वितीयोऽपि दोषः न सम्भवति । तथाहि विघ्नविघातः आदिः कारणम् = प्रयोजकः ययोः तौ इति बहुव्रीह्याश्रयणे, यथा समाप्तेः विघ्नविघातः प्रयोजकः, तथैव प्रचयस्यापि इति, एकया बहुव्रीहिलक्षणया एव तस्यापि लाभेन, नैव लक्षणाद्वयस्वीकारप्रयुक्तो दोषः । बहुव्रीहिलक्षणा तु उभयमते समाना । गुरुराजीये यस्याः इति एकवचनप्रयोगस्तु समुदायाभिप्रायकः । समाप्तेरेव इति एवकारस्तु विघ्नविघातस्य मुख्यफलत्व व्यावृत्यर्थः इति ।

तथा च विघ्नध्वंसस्य कारणतामते एव श्रीव्यासतत्त्वज्ञतीर्थैः दोषस्योद्भावितत्वात्, गुरुराजीये तु प्रयोजकत्वार्थे कारणशब्दः प्रयुक्त इति च विभावयितुं शक्यत्वात् साधु गुरुराजीयम् ॥

वेदापौरुषेयत्ववादे, पौरुषेयतावादिभिः वाक्यत्वानुमाने प्रयुक्तेऽकर्तृकत्वप्रसिदध्यभावरुपः उपाधिः तत्र चोदितः । तन्निरासाय, तथात्वे, प्रामाण्यमेव न स्यादिति अनुकूलतर्कं प्रदर्श्य पूर्वपक्षः दृढीकृतः । तन्निरुपणावसरे टीकायां - **"अनुकूलेन तर्केण सनाथे सति साधने । साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भवः "** इति कारिका उदाहृता । (पृ.१५५)

पां.टि.- अनुकूलेन तर्केण हेतोः साध्यव्याप्यत्वनिर्णयेनोपाधेः साध्यव्याप्यहेत्वव्यापकतया पक्ष एव साध्यव्यापकताभङ्गः सिध्यतीत्यर्थः ।

व्या.टि. - सनाथे = साध्यसाधनसमर्थे सतीत्यर्थः । तथा च पक्षे साध्यसिद्धौ तत्रैवोपाधेः साध्यव्यापकताभङ्गः । केचित्तु - साध्यव्याप्यहेत्वव्यापकत्वात् साध्यव्यापकताभङ्ग इति व्याचख्युः । तत्र स्वरसम् । साध्यव्यापकोपाधिव्यभिचारात् साध्यव्यभिचारं चोदयतः तस्य साध्यव्याप्यत्वासिद्धेः । तदर्थं साध्यनिश्चयानुसरणं तु बकबन्धरीतिमनुसरति इति ॥

विमर्शः-स्वप्रयुक्ते सद्धेतौ उपाधिसन्देहे, अनकूलतर्कं प्रयुञ्जानः वादी निरुपाधिकां व्याप्तिं निश्चित्य साध्यं साधयति । तत्रेयं उपाधिनिरसनस्य प्रक्रिया प्रदर्श्यते - केनचित् पर्वते वह्निसाधनार्थं धूमानुमाने प्रयुक्ते; यदि प्रतिवादिना पर्वतेतरत्वादिरूपः उपाधिः अप्रयोजकता वाऽशङ्क्यते । तत्र तादृशोपाधिः प्रतिपक्षमुन्नयन्, साध्यसाधनयोः व्यभिचारं वा चोदयन् दोषो भवति । तथा च तटवर्तिपुरुषस्य हेतौ व्यभिचारसन्देहः तेनोपाधिनोद्भावितेन फलति । तस्मिञ्शच सति, लिङ्गपरामर्शप्रतिबन्धात् नानुमितिः । अत्र व्याप्तिनिश्चये प्रतिबन्धकीभूतस्य व्यभिचारज्ञानस्य अपसरणार्थं

वादिना अनुकूलतर्कः व्याप्त्यंशे अनुग्राहकः "यदि वह्निः न स्यात् तर्हि धूमोऽपि न स्यात्" इत्यादिरुपः प्रयुज्यते। तेन 'धूमः वह्निव्यभिचारी न भवति वह्निजन्यत्वादि'ति मननपूर्वं व्यभिचारज्ञानं दूरीक्रियते। तदनन्तरं च अनमितिर्जायते ; उपाध्याहितव्यभिचारज्ञाननिरासेन अनुमितेरप्रतिहतत्वात्। इति ॥

अत्रायं गुरुराजीयाभिसन्धिः। यः प्रतिवादी उपाधावुक्ते साध्यसाधनयोः वह्निधूमाद्योः नैकत्र साहचर्यं पश्यन्नपि कार्यकारणभावमननुभूय, अनुभूयाऽपि कार्यकारणभावं विस्मृत्य वा, उपाधेरेव प्रयोजकताभ्रमेण वैय्यात्येन वा, तयोः व्यभिचारं सन्दिग्धे ; तं प्रति अनुकूलतर्कबलेन, व्याप्तिं निश्चाय्य व्याप्तिस्मरणं जनयित्वा वा अनुमानं प्रयोज्यम्। अत्र च अनुकूलतर्केण हेत्वधिकरणत्वावच्छेदेन साध्यनिश्चये जाते उपाध्याहितव्यभिचारज्ञानरूपप्रतिबन्धक एव निष्कास्यते ; न तु उपाधिज्ञानम्। तदनिवारणे, साध्यनिर्णयस्तु असम्भवी। न च वाच्यम्, उपाधेः फलीभूतस्य व्यभिचारज्ञानस्य निवृत्तौ किं तेनेति। अथापि उपाधौ साध्यव्यापकताज्ञानस्य निराबाधात् तदानीमपि उपाधेः जागरूकत्वेन पक्षे साध्यसंदेहस्याधानात्; आहितसंदेहस्य च दोषत्वेन सर्व सम्मतत्वात्। अत एव 'बहोः कालाद् अपेक्षितः साध्यनिर्णयः उपाध्युन्नीतव्यभिचारज्ञानेन प्रतिरुद्धः अनुकूलतर्केण तन्निवारणे सति झटिति उत्पद्यते 'इति तु स्ववीयः। साध्यव्यापकस्योपाधेः पक्षेऽभावात् साध्यनिर्णयाषं भवात्। प्रतिवादिनः साध्यनिर्णयापेक्षायाः एव अभावाच्च। अतः उपाध्याहितस्य सामान्यतो व्यभिचारज्ञानस्य अनुकूलतर्केण वारणेऽपि तदानीमपि जागरूकः उपाधिः प्रथमं निरसनीयः। सः क्रमः प्रस्तूयते- उपाधौ पूर्वमेव हेत्वव्यापकत्वं निश्चितम्। तादृशहेतौ च व्यभिचारसंशयाभावेन सामान्यतः साध्यसामानाधिकरण्यरूपसाध्यव्याप्यत्वनिर्णयोऽनिर्बाधः। एवं च

साध्यव्याप्यहेत्वव्यापकत्वात् उपाधिः न साध्यव्यापक इति निर्णयः शक्यसम्पादः। यत् यद्व्याप्याव्यापकं, तत् तदव्यापकं यथा दण्डव्याप्यघटाव्यापकः पटः दण्डाव्यापकः इति सामान्यमुखी व्याप्तिरत्र द्रष्टव्या। ततश्च एवं रीत्या उपाधौ निरस्ते, साध्यनिर्णयः सुलभः। इति।

इत्थं च, हेतौ साध्यव्याप्यत्वनिश्चयार्थं पक्षे साध्यनिर्णयः अनपेक्षित इति "तदर्थं साध्यनिश्चयानुसरणं तु" इत्यादिना प्रतिपादितो दोषः न गुरुराजीयपक्षे आपतति। तैः पक्षे साध्यनिश्चयस्याननुसरणात्; प्रत्युत सामान्यतः हेत्वधिकरणत्वावच्छेदेन साध्यनिश्चयस्यानुसरणात्। ये पुनः अनुकूल तर्केण पक्षे साध्यनिश्चयः जायते इति मत्वा ततश्च व्याप्तिं निश्चित्य, तादृशहेत्वव्यापकत्वेन साध्यव्यापकताभङ्गमभिलषन्ति तेषामेव बकबन्धरीतिः इति श्री व्यासतत्वज्ञतीर्थानामभिप्रायः।

उपाधिनिरासात् पूर्वमेव साध्यनिश्चय इति वदतां व्यासतत्वज्ञतीर्थानामाकूतिस्तु इयम् - अनुकूलतर्काहित शक्तिविशेषेण साधनज्ञानेन उपाधिमुपेक्ष्यैव साध्यानुमितिरुत्पद्यते. वादिपक्षीयस्य, मध्यस्थस्य च तत्प्रतीक्षासद्भावात्। तदनन्तरमेव उपाधेः साध्यव्यापकता भङ्गः इति।

परिपन्थिनः तादृशापेक्षाभावेन उपाधिनिरासात् पूर्वं नानुमितिरिति केशवाचार्याः। एवं च अधिकारिभेदेन व्यवस्थेयं युज्यते ॥ ।

ॐ

मूलम्-(पृ.३२३) विमतं सकर्तृकं कार्यत्वाद् घटवदित्युक्ते विमतं विकर्तृकमस्मत्सम्मतकर्तृरहितत्वादात्मवदित्यनुमान विरोधात् ॥

टीका-"ननु अस्मत्सम्मतकर्तृरहितत्वादित्यत्र अस्मत्सम्मतत्वं, कर्तृरहितत्वस्य वा विशेषणं कर्तुर्वा । नाद्यः, व्यर्थत्वात् । तत्त्यागे साध्याविशिष्टत्वात् " इति प्रथमकल्पं दूषयित्वा द्वितीयेऽपि शरीरादिमान् कर्ताऽनेनोच्यते इति पक्षे - " किं शरीरादिरहितः कर्ता अङ्गीक्रियते न वा । आद्ये तत्कृते व्यभिचारः । द्वितीये पुनः वैय्यर्थ्यं, साध्याविशिष्टता च । न च सामान्यविशेषभावेन भेदः । शरीरादिरहितस्य कर्तुरनङ्गीकारे सामान्यस्यानुपपत्तेः "। इति टीकायां वाक्यसन्दर्भः ॥

पां.टि.- साध्याविशिष्टता चेति ॥ तत्त्याग इति शेषः ।

व्या.टि.- साध्याविशिष्टतेति ॥ अभावयोः समनैय्यत्येन ऐक्यात् धूमाभाववान् प्रमेयधूमाभावादित्यत्रेव साध्यावैशिष्ट्यमिति ध्येयम् ।

विशेषणत्यागे साध्यावैशिष्ट्यमिति व्याख्यानं चिन्त्यम् । "न च सामान्य" इत्युत्तरग्रन्थासङ्गतेः ॥

विमर्शः-अत्रायं पाण्डुरङ्गी - आचार्याणां भावः । पूर्वं कर्तृराहित्ये अस्मत्सम्मतत्वविशेषणमिति कल्पे प्रथमं वैय्यर्थ्यं, अनन्तरं च तत्त्यागे साध्याविशिष्टता इति दोषोद्भावनक्रमोऽनुसृतः टीकाकारैः । तदनुरोधेनैव अत्रापि प्रकृते शरीरादिमत्त्वविशेषणे कर्तरि दत्ते, वैय्यर्थ्यं ; शरीररहितस्य कर्तुः अनङ्गीकारात् व्यावर्त्याभावात् । यदि त्यज्यते, तर्हि साध्यसाधनयोः वैशिष्ट्यमेव न भवति । इति । तदर्थमेवात्र 'च'ेति शब्दः व्यवस्थितविकल्पप्रत्यायकः बोध्यः । एतादृशार्थकत्वं, तत्त्वोद्योत

टीकायां भेदानुमाननिरूपणावसरे भेदस्य साध्यमानस्य, सकलप्रतियोगिकत्वपक्षे "पूर्ववदंशे बाधात्। अप्रसिद्ध-विशेषणत्वाच्च" इत्यत्र सर्वैः व्याख्याकारैः वर्णितम् (तत्त्वोद्योते. पृ. १३१) ॥

अथ विशेषणत्यागे 'न च सामान्यविशेषभावेन 'भेद इत्युत्तरग्रन्थासङ्गतिरिति चेत् तत्र वदामः । तथा हि- कर्तरि शरीरादिमत्त्वविशेषणं व्यर्थमिति प्रथममुक्तम् । वैय्यर्थ्यभिया यदि त्यज्यते, तर्हि साध्यसाधनयोरविशेषः । यदि पुनः विशेषणं सामान्यविशेषभावसम्पादनार्थं, तेन च भेदः इति सार्थक्यमुपपाद्यते, तदाऽपि शरीरादिमत्कर्तुरनङ्गीकारेण साध्यसाधनयोर्मध्ये 'इदं सामन्यम्' 'अयं विशेषः' इति भेदः न युज्यत एवेति ग्रन्थार्थः इति न कश्चित् क्षुद्रोगद्रवः । इति ।

किञ्चात्राभावयोः समनैय्यत्येनैक्यमङ्गीकृत्य विशेषणसत्त्वपक्ष एव साध्यावैशिष्ट्यमिति यदुक्तं, तत्तु पूर्वग्रन्थविरोधि इति भासते । कथमन्यथा, पूर्वमपि कर्तृराहित्ये अस्मत्सम्मतत्त्वविशेषणपक्ष एव अभावयोः समनैयत्येनैक्यमाश्रित्य साध्यवैशिष्ट्यकथनसम्भवे, "तत्त्यागे साध्याविशिष्टता" इत्युक्तिः ? तथा च तत्र तत्यागे एव साध्यावैशिष्ट्यकथनेनेदं ज्ञायते यत् सर्वथा विशेषणसत्त्वे, विशिष्ट प्रतियोगिकत्वे वाऽभावयोः न समनैयत्येन ऐक्यं वाच्यमिति । एतेन अभावे व्यावर्तकविशेषणसत्त्वे, प्रतियोगिनि वा व्यावर्तकविशेषणसत्वे एव अभावयोर्भेदः, न त्वन्यथा इत्यपि प्रत्युक्तम् । पूज्या अस्मद्गुरुचरणास्तु "पूर्वं कर्तृराहित्ये अस्मत्सम्मतत्वविशेषणकल्पे तत्त्यागे साध्यावैशिष्ट्योक्तेः तत्र उपपत्त्यन्तरं प्रकल्प्य, प्रकृते तावत् अभावयोः समनियतयोः लाघवेनैक्यमेव स्वीकृत्य श्रीव्यासतत्त्वज्ञतीर्थानां पक्षः उपपादनीयः" इति समादधते ।

परं सिद्धान्ते एकाकार व्यवहारसिद्धानां तत्तदत्यन्ताभावनामेकत्वे लाघवमिति तत्र तु ऐक्यं उररीकृतम् । अथाऽपि तदन्यत्र केवलान्वयिनामनेकेषां शशविषाण - नरविषाणाद्यभावानां नैव अभेदः स्वीकृतः । तथात्वे पर्यायतापत्त्या, मम शिरसि विषाणं नास्तीत्यादौ नरविषाणाभावादेरेव प्रतीत्यापत्त्याद्यनेकदोषप्रसङ्गात् । किञ्च अप्रामाणिक प्रतियोगिकात्यन्ताभाववादिमते सर्वेषामभावानां ऐक्येन, एक एवात्यन्ताभावः स्यात् । न च इष्टापत्तिः । व्यवहारवैविध्यविलोपापत्तेरिति।प्रामाणिकप्रतियोगिकात्यन्ताभावमते-ऽपि पूर्वोक्तरीत्या केवलान्वयिनामभावानामभेदापत्त्या दोषो दुरुद्धर एव । अतः सर्वथा सर्वत्राभावानामभेदः सिद्धान्तविरुद्ध इति कथं तद्व्याख्यासङ्गमनम् ?।।

अतः टीकाविरोधादिपरिहाराय अभावानामैक्यमिति पक्षे परित्यक्ते, अनन्यगत्या तत्त्यागे इति शेषपूरणमेव वरमिति भाति ।

मूलम्-(पृ.९०) "इतिहासपुराणः पञ्चमो वेदानां वेदः" इति तद्गृहीतत्वाच्च ।।

टीका- इतिहासश्च पुराणं चेति द्वन्द्वैकवद्भावः । नपुंसकत्वं तु नाश्रितम् । पुराणशब्दस्य विशेष्यलिङ्गत्वाद् ग्रन्थविशेषणत्वेन पुल्लिङ्गत्वमेवाश्रितम् इति ।।

पां.टि.- नन्वेकवद्भावप्रयुक्तनपुंसकत्वाप्रसङ्गेऽपि 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयो'रिति द्वन्द्वतत्पुरुषयोः परवल्लिङ्गविधानात् पुराणशब्दलिङ्गस्य नपुंसकस्यैव प्रसक्त्या इतिहासपुराण इति पुल्लिङ्गत्वानुपपत्तिः तदवस्थैवेत्यतो नियतलिङ्गानां विशेषणानां विशेष्यनिघ्नत्वाभावेऽप्यनियतलिङ्गानां विशेषणानां विशेष्यनिघ्नत्वेन

तल्लिङ्गत्वनियमात्, ल्युडन्तपुराणशब्दस्यानियतलिङ्गत्वेन विशेष्यभूत ग्रन्थलिङ्गवत्त्वस्यावश्यकत्वात् "पुराणप्रतनप्रत्नपुरातन- चिरन्तनाः 'इति विशेष्यनिघ्नत्वस्मरणाच्च न तदनुपपत्तिः इति आह "पुराणशब्दस्ये"ति इति ।।

व्या.टि.- ।। नपुंसकत्वन्तु इति ।। उक्तविधया परवल्लिङ्गमित्येतदपि न प्रवृत्तमित्यर्थः । (पुराणशब्दस्य नियत-नपुंसकत्वेनेति भावः) व्यत्ययेन पुंस्त्वमप्याश्रितमित्यवधेयम् । समाधानान्तरमाह- पुराणशब्दस्येति । एतत्पक्षेऽप्युक्तविधया 'स नपुंसकमिति' नाश्रितमिति ध्येयम् । परवल्लिङ्गमित्यनेन तु पुल्लिङ्गमेव । ग्रन्थविशेषे रुढस्य लोकप्रसिद्धनियत नपुंसकत्व-स्वारस्याय विधिद्वयानाश्रयणं व्यत्ययेन पुंस्त्वाश्रयणं च पूर्वसमाधाने । एतत्समाधाने तु व्यत्ययानाश्रयण परवल्लिङ्गत्वस्वारस्याय ग्रन्थविवषे रूढस्यापि विशेष्यनिघ्नत्वं एकवद्भावप्रयुक्तनपुंसकत्वानाश्रयणं च स्वीकृतमित्यवधेयम् । द्वितीयसमाधाने विग्रहोऽपि पुल्लिङ्गेन कर्तव्यः।

केचित्तु-परवल्लिङ्गमित्यनेन प्राप्तनपुंसकत्वपरिहाराय पुराणशब्दस्य विशेष्यवचनतया इति योजयित्वा 'पुराणप्रतन प्रत्नपुरातनचितन्तनाः' इति कोशानुसारेण पुरातनपर्यायस्य पुराणशब्दस्य विशेष्यनिघ्नत्वमित्येकवाक्यतामाहुः । तेषां नपुंसकेन विग्रहप्रदर्शनम्, इतिहासस्यापि पुरातनग्रन्थत्वेन पृथक् कथनं, भागवतादिग्रन्थविशेषोपस्थानं च कथमिति चिन्त्यम्। इति ।।

विमर्शः- तत्र इतिहासस्यापि पुरातनग्रन्थत्त्वेन पृथक् कथनस्यायुक्ततारूपः द्वितीयो दोषः नैव घटते । यदि भवत्पक्षेऽपि द्वितीयव्याख्यानमाद्रियते तदा कुतो वा इतिहासस्य पृथक् कथनम् ?

तदर्थं यत् समाधानमुच्यते युष्माभिः ; तदेव अस्माभिरपि कथ्यत इति नानुपपत्तिगन्धोऽपि ।

नापि तृतीय आक्षेपः । तत्रापि भवद्रीत्या द्वितीयसमाधानकल्पे यथा भागवतादिग्रन्थोपस्थानं तथैवास्मन्मतेऽपीति वक्तुं शक्यत्वात् । तथा चेदं प्रश्नद्वयं उभयपक्षेऽपि समानमिति तत्र काचनोपपत्तिः कल्प्या ; न तु इतरपक्षे दोषत्वेन कथनं युक्तमिति ।

अत्र प्रथमदोषस्तु सुतरां न युज्यते । समासात् पूर्वं विग्रहवाक्ये लोकप्रसिद्धिमनुसृत्यैव तथा कथनात्। समासानन्तरं क्लीबत्वं कुतो नाश्रितमित्येव खलु अत्र आशंकितं, समाहितं च । अतः गुरूराजीयाशयः दोषनिर्मुक्तः स्वरसश्च । मतान्तरे तु न मानम् । / पुराण शब्दस्येत्यादिवाक्ये समाधानंद्वयमुक्तमित्यत्र नियामकाभावात्, विकल्पबोधकपदाभावात् । न च, प्राक् इतिहासश्च पुराणं चेति एकवद्भावे पुराणशब्दस्य नपुंसकत्वेन पठनं, ततश्च तस्य विशेष्यलिङ्गत्वाद् ग्रन्थविशेषणत्वेन, पुल्लिङगत्वमेवाश्रितमिति पुराणशब्दस्य पुल्लिङ्गत्वाश्रयणमेव नियामकमिति वाच्यम् । सामान्ये नपुंसकमिति सामान्यत एव नपुंसकत्वाश्रयणस्योपपादयितुं शक्यत्वात् तथा चास्मत्पक्षोक्तरीत्या नपुंसकत्वस्योपपादयितुं शक्यत्वे, परिहारान्तरपरताद्योतकानां 'वा'ऽदि शब्दानामभावेऽपि तथा व्याख्यानमयुक्तमिति भाति ।

किञ्चास्मिन् पक्षे- "पुल्लिङ्गत्वमेवाश्रित" मिति एवकारस्वारस्यानुरोधेन, " नपुंसकत्वन्तु नाश्रित" मित्यतः परं प्रत्युतेति पूरणेन, एकवाक्यतया एव युक्ततया स्फुरणं बाधकं इत्यप्याभाति । अपि चास्मिन्नेव पक्षे - "नपुंशकत्वन्तु नाश्रितं" इत्यतः परं साकाङ्क्षताप्रयुक्तवाक्याभासतावारणाय व्यत्ययेन पुंस्त्वमेवाश्रितमिति अध्याहर्तव्यम् । एवमुत्तरस्मिन् पुराणशब्दस्येति

वाक्येऽपि साकांक्षता प्रयुक्तवाक्याभासतावारणाय एकवद्भावप्रयुक्त नपुंसकत्वानाश्रयणपरतयाऽपि एकं वाक्यमिति वक्तव्यं चेति अध्याहारः, व्याख्यान्तरताद्योतक-च-वाऽदिशब्दाभावः, एकवाक्यतया स्फुरणं, एकवाक्यतया योजनसम्भवे अपि भिन्नवाक्यतया कल्पनं चेति बाधकानि दुष्परिहराणि ।।

अस्मत्पक्षस्तावान्निर्दुष्टः । पुराणशब्दस्य पूर्वं नपुंसकत्वाश्रयणं हि । अभ्युपेत्यापि सङ्गच्छते- 'सामान्ये नपुंसक'मिति सामान्यतो वेति एकवाक्यतापक्षे आरोपितानां दोषाणां अपाकृतत्वात् । इतिहासादिशब्दः एवं भागवतादिग्रन्थविशेषोपस्थानं च कुरूपाण्डवन्यायेनापि भवति । भवद्भिरपि द्वितीयसमाधानपक्षे एवमेव समाधातव्यत्वात् ।

एवं व्याख्यानान्तरतापक्षे परवल्लिङ्गत्वस्वारस्याय ग्रन्थविशेषे रूढस्यापि विशेष्यनिघ्नत्वमिति यदुक्तं तन्न ; यतः ग्रन्थविशेषे रूढस्य विशेष्यनिघ्नत्वमदृष्टचरमेव । विशेष्यनिघ्ना हि न केवलं प्रयुज्यन्ते अपि तु विशेष्यवाचकसाहित्येनैव । यथा 'शुक्लः पटः' इत्यादि । न च अष्टादशपुराणवाचकस्य पुराणशब्दस्य पुल्लिङ्गेनापि प्रयोगो दृष्टः । पुराणानि तदर्थानि इत्यादौ केवलस्य तस्य क्लीबत्वेनैव प्रयोगदर्शनात् । । यच्चोक्तं- परवल्लिङ्गस्वारस्यायेति तदप्यसाधु ; तथा हि- तद्धि परवल्लिङ्गस्वारस्यं यद्विशेष्यवाचकपदस्य नपुंसकत्वेऽपि विशेषणवाचकपदस्य समासे प्रकृतिलिङ्गत्वेनावस्थानम् यथा "अर्थवदधातुरप्रत्ययः प्रातिपदिक" मिति विशेष्यप्रतिपादकस्य प्रातिपदिकपदस्य क्लीबत्वेऽपि विशेषणस्य समासेपि प्रकृतिलिङ्गतयापुंस्त्वेनैवावस्थानम् । नचात्र तादृशं परवल्लिङ्गत्वमस्तीति कथं तद्युक्तम् ?

अत्र विषये विपश्चिद्भिः बहुतरं चिन्तनीयमिति पां.टिप्पण्याः साधुतामात्रं साधयित्वा विरम्यते ।

ॐ

(पृ.१५५) मूलम्- प्रामाण्यं स्वत एव । अन्यथानवस्थानात् ।

टीका- "साक्षी स्वयम्प्रकाशस्स्वात्मानं स्वप्रामाण्यं च गोचरयतीत्यङ्गीकारात् नानवस्था" इत्युक्त्वा, **"ज्ञानस्यैव तथाभावोऽभ्युपगम्यतामिति चेत्, अन्तःकरणवृत्तेः ज्ञानस्य जडत्वेन स्वयम्प्रकाशत्वायोगात्"** इत्युक्तम् ।

पां.टि.- ज्ञानस्यैवेति ।। लाघवादिति भावः ।। अन्तःकरणवृत्तेरिति ।। ननु जडत्वं न स्वप्रकाशत्वाभावे प्रयोजकम् । अन्यथा साक्षिणोऽपि चेतनत्वात् न स्वप्रकाशत्वं स्यादिति चेन्न । क्रियायाः कारकप्रयोज्यत्वस्य सकलवादिसम्मतत्वेन प्रयोजकस्य च प्रयोज्यापेक्षया पूर्ववृत्तितानियमाज्ज्ञप्तिरूपवृत्तिक्रियायाः स्वकर्मकत्वे, स्वापेक्षया स्वस्य पूर्वभावित्वरूपात्माश्रयाऽऽपत्त्या स्वकर्मकप्रकाशत्वरूपस्वप्रकाशत्वमनुपपन्नमेव । जडत्वं चात्र जन्यत्वरूपं ग्राह्यम् । इति ।।

व्या.टि.- जडत्वेनेति ।। तच्च (स्वयम्प्रकाशात्वं च) स्वप्रमातृत्वम् । जडत्वस्याप्रमतृत्वात् । इत्थं च मनोवृत्तिः स्वप्रमात्री अप्रमातृत्वात्, यदेवं तदेवं यथा घट इति युक्तेरभिप्रेतत्वात् न काप्यनुपपत्तिः ।

वस्तुतस्तु ..तच्च..विशिष्य स्वकर्मकापरोक्षत्वम् । इत्यादि च।। केचित्तु "जडत्वेन =जन्यत्वेन स्वकर्मकत्वमनुपपन्नम् । कर्मकारकस्य कारणत्वेन स्वस्य स्वपूर्ववृत्तित्वे आत्माश्रयापत्तेरित्याहुः"। तदस्वरसम् । भविष्यत इवाकारणत्वेऽपि कर्मकारकत्वोपपत्तेः । इति ।

विमर्शः- अत्रेदं समाधानमवधार्यम् । तदित्थं- पां.टिप्पण्यां क्रियासामान्यस्य एव कारकप्रयोज्यत्वे सकल वादिसम्मतिरस्तीत्युक्तम् । तथा च ज्ञप्तिरूपक्रियाया अपि कारक प्रयोज्यत्वम्- स्तीत्यङ्गीकृतं भवति ; तत्तु न सङ्गच्छते परोक्षेज्ञाने भविष्यतोऽपि घटादेः विषयत्वानुभवेन व्यभिचारात् इति आपाद्यते चेदिष्टमेव नः । न वयं ज्ञानसामन्यस्य क्रीयारूपत्वेन कारकसापेक्षतां ब्रूमः ; अपि तु प्रत्यक्षज्ञाने एव । एवं च पूर्वोक्तापादनं नास्मकं मते वक्तु युक्तम् । अत्र स्वविषकत्वेनोच्यमानस्य ज्ञानस्य प्रत्यक्षत्वं 'ज्ञप्तिरूपक्रियायाः स्वकर्मकत्वे' इत्यनेन सूचितम् ।

अथ प्रत्यक्षात्मके ज्ञानेऽपि कर्मादिकारकं कुतोऽपेक्ष्यते ? इति चेत्तत्रेदमुत्तरम् । ज्ञानं खलु क्रियारूपं कार्यम् । तस्य प्रत्यक्षात्मकस्योत्पादे सन्निकर्षस्य कारणतां सर्वे वादिनः अभ्युपगच्छन्ति । सन्निकर्षो हि इन्द्रियार्थयोः सम्बन्धः। यथा- चक्षूरूपयोः सन्निकर्षः रूपप्रत्यक्षे । तथा च सन्निकर्षोपपत्त्यर्थं सम्बन्धिभूतस्यार्थस्य पूर्ववृत्तित्वमावश्यकम् इति प्रत्यक्षे कर्मकारकसापेक्षता सिद्धा ।।

नन्वस्तु प्रत्यक्षस्य कर्मकारप्रयोज्यत्वं तथापि मनोवृत्तिज्ञानस्य अनुमितिशाब्दाद्यात्मकस्य कर्मकारकप्रयोज्यत्वंमसिद्धमिति तु ना शङ्कनीयम् । तादृशानुमित्याद्यात्मकस्यपि वृत्तिज्ञानस्य स्वकर्मकत्वे आशङ्किते, विषयीभूते स्वस्मिन् तस्य प्रत्यक्षरूपत्वात् । स्वस्य

विषयीकारे तस्य ज्ञानस्य लिङ्गाद्यनुसान्धानस्यानपेक्षणात् । एवं च स्वविषये लिङ्गद्यनुसन्धानरहिते, बाह्यार्थागोचरे, स्वकर्मके वृत्तिज्ञाने लौकिकमानसप्रत्यक्षात्मके, कर्मकारकापेक्षा सुतरामस्तीति स्वस्य स्वपूर्ववृत्तित्वमावश्यकम् । तत्तु न सम्भवति । अतः जन्ये वृत्तिज्ञाने न स्वकर्मकत्वमुपपद्यते इति केशवभट्टारकैः टीकाया आशयो वर्णितः ।

ननु मानसप्रत्यक्षं हि तादृशं स्वविषयकं मनोवृत्तिज्ञानमिति कथितम् । तत्र सन्निकर्षार्थं तद्विषयीभूतस्य स्वस्य पूर्ववृत्तिताऽऽवश्यकी । सा नोपपद्यते इति चोपपादितम् । परन्तु सन्निवर्षः तादात्म्यमेवेत्यङ्गीकुर्मः । तदा पूर्वं स्वस्याभावेऽपि तादात्म्यसन्निकर्षस्तु उपपद्यत एवेति ज्ञानस्यैव स्वकर्मकत्वे न कोपि हानिरिति चेदत्रोच्यते- उपादानस्य मनसः तज्जन्यज्ञानस्य च यद्यपि तादात्म्यमस्ति, तथापि यस्मिन् क्षणे सन्निकर्षः तदैव ज्ञानोत्पादासम्भवेन, तादात्म्यरूपसन्निकर्षादव्यवहितोत्तरमेव स्वविषयकज्ञानमिति वाच्यम् । ततश्च ज्ञाने जाते सन्निकर्षः सन्निकर्षे सम्पन्ने सत्येव ज्ञानमित्यन्योन्याश्रयापत्तिरिति तादातम्यस्य सन्निर्कर्षत्वं न घटते ।

यदि च प्रथमं ज्ञानमुत्पद्यते, तदनन्तरं तादात्म्यं, तदनन्तरं च ज्ञानस्य स्वविपषयकत्वमित्युच्यते तर्हि ज्ञानस्य प्रथमक्षणे अज्ञातत्वापत्त्या, "ज्ञानं स्वविषयकमेवोत्पद्यते " इति स्वमतविरोधप्रसङ्गः ।

यद्यपि अनुत्पन्नमपिकार्यं उपादानाभिन्नमिति, ज्ञानोत्पत्तेः पूर्वमपि तादात्म्यसन्निकर्षसद्भावः तथापि तस्य सन्निकर्षत्वं नास्ति । कारणात्मना स्थितस्य वस्तुनः सन्निकर्षः विशिष्य तस्य ज्ञानं न जनयतीत्यङ्गीकारात् अन्यथा मृदादिरूपेण विद्यमानस्य घटादेः चक्षुःसंयोगेन घटत्वेन घटज्ञानं जायतामित्यापत्तेः ।

किञ्च ज्ञानोत्पत्तेः पूर्वं ज्ञान-मनसोस्तादात्म्यमपि कारणात्मना एव भवति न तु कार्यात्मना इति कारणात्मना स्थितस्य तस्य ज्ञाने स्वविषयीकरणप्रयोजकत्वासम्भवात् न सन्निकर्षत्वम् । न च, कारणात्मना स्थितस्यापि तादात्म्यस्य कारणत्वमस्तु इति वाच्यम् ; कारणात्मना विद्यमानस्य घटादेः सकाशात् जलाहरणादिव्यवहारः स्यादित्यापत्तेः । न च तत्रेव कार्यात्मना वर्तमानस्य तादात्म्यस्य ज्ञान कारणत्वाभावात् स्वविषयकज्ञानप्रयोजकसन्निकर्षत्वमसिद्धम् ।; प्रत्यक्षस्थले सर्वत्रापि संयोगादिसन्निकर्षस्य संयोगत्वादिना रूपेण स्थितस्यैव कारणतायाः दृष्टचरत्वात् । तथाच अत्र तादात्म्यस्य सर्वथा न सन्निकर्षत्वम् । साक्षिस्थले तावत् तादृशतादात्म्यस्य ज्ञान प्रयोजकत्वं प्रमाणसिद्धम् ; धर्मिग्राहकमानेनैव सिद्धत्वात् । अत्र मनोवृत्तौ तु प्रमाणं विना सर्वमेतत्कल्प्यमिति न स्वविषयकत्वं युक्तम् । अत एव कार्यसहभावेनैव तादात्म्यस्य स्वज्ञान (स्वविषयीकरण) कारणत्वमस्तु इत्यपि अपास्तम् ; तत्कल्पनेऽपि मानाभावात् । इति दिक् ।।

("तादात्म्यस्य कारणात्मनाऽवस्थानं, न कार्यात्मना" इत्यादिव्यवहारस्तु सुधायां अनित्यवस्तुगतभेदस्य वस्तुनः उत्पत्तेः पूर्वं, नाशानन्तरं च भेदः कारणात्मना तिष्ठति इत्यङ्गीकरणेन अर्थात्सिद्धः ; समानन्यायत्वात् इति ज्ञेयम्)

अथ प्रकृतमनुसरामः । मनोवृत्तिरूपज्ञानस्य स्वप्रकाशत्वे शङ्किते ; तस्य जडत्वेन न तद्युक्तमिति टीकायाः वृत्तेः जन्यत्वेन स्वप्रकाशत्वनिराकरणपरतया पाण्डुरङ्गी-आचार्यैः व्याख्यातम् । अस्य निरवद्यता विस्तरेण प्रत्यपादि । इतोऽपि तत्रैका संशीतिरूपजायते जडत्वेनेत्यस्य स्वरससिद्धः अप्रकाशत्वरूपः अप्रमातृत्वरूपो वाऽर्थः कुतो न स्वीकृतः इति । तत्रायं समाधिः- जडत्वेन = अप्रमातृत्वेन, अप्रकाशत्वेन वा स्वप्रकाशत्वाभावस्य

साधने, प्रतिपक्षी स्वप्रकाशत्वं वृत्तेरङ्गीकुर्वाणः न अप्रमातृत्वमप्रकाशत्वं वाऽङ्गीकरोतीति तदपि साधनीयं भवति । वस्तुतस्तु वृत्तिज्ञानस्य 'घटः प्रकाशते' इति व्यवहारानुरोधेन प्रकाशरूपताभ्युपगमात्, अप्रमातृत्वमेव तदिति वक्तव्यम् । तदपि प्रतिवादिनं प्रति साधनीयामिति तत्पक्षं परित्यज्य, जडत्वेन = जन्यत्वेन तादृशज्ञानस्य स्वप्रकाशत्वं निराकृतम् । सुधायामपि "कर्तृकर्मव्यपदेशाच्चे"ति सूत्रव्याख्यावसरे त्रिपुटीप्रत्यक्षवादिभिः ज्ञानस्यैव स्वप्रकाशत्वे पूर्वपक्षिते, जन्यत्वेनैव हेतुना तत् पराकृतम् । तदनुरूद्ध्य अत्रापि स एव हेतुरादृत इति बोध्यम् ।

पूज्यैः श्रीव्यासतत्त्वज्ञतीर्थैः स्वप्रकाशत्वं = स्वकर्मकापरोक्षत्वमित्युक्त्वा, जडत्वेन प्रसिद्धेनैव हेतुना तदभावः साधितः । जन्यत्वेन साधनन्तु जडत्व शब्दस्य प्रसिद्धार्थत्यागेऽपि सुधानुसारि साधु मार्गान्तरमित्यलं बहुना ।।

मूलम् (पृ.२१२) कादाचित्कभ्रान्तिरेवादित्योदयादिदर्शनान्निवार्यते ।

टीका - अनेनप्राच्यादिशब्दव्युत्पत्तौ आदित्योदयादीनामुपलक्षणत्वेनोपात्तत्वात् तदर्थमपि उपयोग इति सूचितम् ।।

पां.टि.- नन्वादित्योदयादिना प्राच्यादिशब्दव्युत्पत्तेरपि दर्शनेन तस्य व व्युत्पत्तावपि उपयोगसिद्धेः 'कादाचित्कभ्रान्तिरेवाऽऽदित्योदयादिदर्शनान्निवार्यते' इति दिगन्तरे दिगन्तरत्वभ्रममात्रनिवर्तकत्वाभिधानमादित्योदयादेरनुपपन्नमित्यत आह ।। अनेनेति ।। अत्रानेन तदर्थमप्युपयोग इति सूचितमिति सम्बन्धः । अनेन = आदित्योदयादेः भ्रमनिवर्तकत्वकथनेन, तदर्थमपि = प्राच्यादिशब्दव्युत्पत्त्यर्थमपि उपयोग इति सूचितमित्यर्थः । न केवलं भ्रमनिवृत्त्यर्थमपि तु प्राच्यादिशब्दव्युत्पत्त्यर्थमपीति अपि शब्दार्थः ।

ननु कादाचित्केति मूले आदित्यदर्शनस्य भ्रमनिवृत्त्यर्थकत्वोक्तेस्तदर्थमुपयोगसूचनसम्भवेऽपि प्राच्यादिशब्दव्यत्पत्त्यर्थताया मूलेऽनुक्तेः न तदर्थतयोपयोगसूचनं सम्भवतीत्यत उक्तम् ।। प्राच्यादिशब्दव्युत्पत्तावादित्योदयादीनामुपलक्षणत्वेनापात्तत्वाद् इति ।। भ्रमनिवर्तकत्वेनाऽऽदित्योदयादेः उपयोगकथनस्य आदित्योदयादीनां प्राच्यादिशब्दव्युत्पत्तौ उपयोगोपलक्षणत्वेन स्वीकारादित्यर्थः । अनेन भ्रान्तिर्निवार्यते इत्यत्र, भ्रान्तिपदेन लक्षणया प्राच्यादिशब्दवाच्यत्व प्रमापरिग्रहः । 'निवार्यते' इत्यनेन लक्षणया भवतीति अर्थपरिग्रहः । लक्षणाऽपि अजहत्स्वार्था एवेति भावेनोपलक्षणपदप्रयोगः । न च युगपद्वृत्तिद्वयविरोधः । सिद्धान्ते तस्यादोषत्वादिति ।।

व्या.टि.- अधिकरणसिद्धान्तमाह- ।। अनेनेति ।। ...... कथमुपादानमित्यत आह ।। उपलक्षणत्वेनेति । संस्थानविशेषविशिष्टस्य देवदत्तगृहशब्दवाच्यत्वे काकादेरिव..... ... शक्यतानवच्छेदकत्वेऽपि शक्तिनियतत्वेनोपात्तत्वादित्यर्थः । तदर्थमपि = शक्तिप्रमार्थमित्यर्थः । शब्दशक्तिप्रमोपयोगाभावे तद्भ्रमनिरासासम्भवात् । .... केचित्तु भ्रान्तिपदेन प्रमाया, निवार्यत इत्यनेन भवतीत्यस्य चोपलक्षणावृत्त्या ग्रहणेन शब्दव्यत्पत्तौ कारणतया आदित्योदयादिनांमुपातत्वात् तदर्थमप्युपयोग इति सूचितमित्याहुः। तत्रस्वरसम् । उपलक्षणावृत्तिमत्पदस्य भ्रान्तिरित्यस्य, निवार्यते इत्यस्य चाग्रहणात् । उपलक्षणीयस्यापि प्रमाभवनादेरनुक्तेः । व्युत्पत्तावित्यादेर्यथाप्रतीतावन्वयसम्भवे त्यागायोगाच्च । उपलक्षणा वृत्त्या ग्रहणे सूचितमित्ययोगाच्च ।

विमर्शः- अत्र गुरुराजीयभावो वर्ण्यते - उपलक्षणपदं लक्षणावृत्तिमत्पदवाचकमिति समान्यतः सकलतान्त्रिकतन्त्रप्रसिद्धिः । तदनुसारेण अस्य वाक्यस्याशयो विवृतः केशवभट्टारकैः । तथा च अदित्योदयादीनां भ्रमनिवर्तकत्वकथनेन तादृशव्युत्पत्त्यर्थमपि तेषां

उपयोग इति सूचितम् इत्युक्तौ, अत्र कथं सूचितम् ? लक्षणया चेत्, लाक्षणिकं पदं किम्? इत्याकांक्षानिवृत्त्यर्थम् उपलक्षणत्वेनोपात्तत्त्वादित्युक्तम् । कस्य इत्याकांक्षानिवृत्त्यर्थमेव उपयोगरुपार्थसूचनार्थमेव श्रीमदाचार्यैः मूले उपात्तस्य 'भ्रान्ति-निवार्यते' पदघटितस्य भ्रान्तिनिवारकत्वकथनस्य अध्याहारोऽत्र उपलक्षणत्वेनेत्यतः पूर्वं करणीयः । यथोक्तमभियुक्तैः 'यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितं । वाक्यं वेति सतां नीति'रिति ।

तथा च मूलकारेण उपयोगरुपोंऽशः लक्षणया कीर्त्यते इति भावः टीकाया उक्तो भवति ।

वाक्यान्वयक्रमस्तु- प्राच्यादिशब्दव्युत्पत्तौ आदित्योदयादीनां उपयोगोपलक्षणत्वेन तेषां भ्रान्तिनिवारकत्वकथनस्योपात्तत्त्वात्, भ्रान्तिनिवारकताकथनेन " तदर्थमपि उपयोग " इति सूचितमिति । एतन्मते क्लिष्टकल्पनारूपत्वेन भासमानेऽपि उपलक्षणमित्यस्य लक्षणावत्पदमिति प्रसिद्धार्थस्वीकारः, उपात्तत्त्वादिति पदस्य सार्थक्यं च गुणः । अन्यथा भूतार्थे क्तप्रत्ययान्तस्य उपात्तशब्दस्यासङ्गत्यापत्तिः दुर्वारणा स्यात् । लक्षणावृत्या बोधितेर्थे 'सूचित' शब्दप्रयोगे सार्वजनीनोऽनुभव एव मानम् । इतरे दोषास्तु 'उपलक्षणशब्दस्य प्रसिद्धार्थतोपपत्त्यर्थं, उपात्तत्वपदस्वारस्याय च 'यत्रानवससोन्यत्रेत्याद्युक्तदिशा शास्त्रेऽस्मिन् प्रकरणे नैव लग्नतां भजन्ते इति गुरूराजोक्त मार्गः समीचीन एवेति मे मतम् । परप्रमेयन्तु लघुप्रभोक्तदोषाणामलग्नकतैव न तु दूषणम् ।। महान्तः सहृदयाः सन्तः दोषज्ञा एवात्र प्रमाणम् ।।

गुरूराजगुरोः पातु वाग्धेनुः कामितार्थदा ।
अवबोधेन यस्यास्तु मूको वाचस्पतीयति ।।

यद्विद्यादीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ।।

विश्वमान्य कराब्जोत्थान् श्रीसुधासौमतत्परान् ।
श्रीविश्वेशतीर्थाख्यान् नौमि विद्यागुरून्मम ।।

श्री कृष्णार्पणमस्तु



डा. पुरोहित नरसिंहाचार्याः विमर्शाख्य-ग्रन्थेऽभिहितान् विषयान् सप्रमाणं विमृश्य लघुप्रभोक्तदोषलग्नकतां पुनस्सम्पाद्य प्रतिविमर्शात्मक-रूपग्रन्थं आरचयन् । ग्रन्थे चास्मिन् बहवोऽपूर्व प्रमेयाः सप्रमाणं प्रतिविमर्शिताः सन्ति । उदा-ः तृतीयभागे "सर्वत्राभावानामभेदः सिद्धान्तविरुद्धः" इति विमर्शकारैः कृतस्याक्षेपस्योपरि "ऐक्यसाधक-प्रमाणसत्वे एव परस्परमभावानां समनियतत्वेन ऐ-क्यमिति" सूक्ष्मतमप्रमाणनिरूपणपुरस्सरं ऐजी-आचार्याणां लघुप्रभाव्याख्यानस्य हार्दाभिप्रायः प्रतिविमर्शात्मके ग्रन्थे समर्थितो वर्तते । एवमेवान्येषु भागेष्वपि अत्यन्तसूक्ष्मेक्षिकया प्रतिविमर्शः कृतः इति "प्रकटीकृतटीकोक्तिरिति विशेषणं व्यासतत्त्वज्ञतीर्थानां सम्भवत्येवेति सर्वेष्वपिभागेषु समर्थितमित्यतः नूनमभिनन्दनीयाः नरसिंहाचार्याः। अतएव । लघुप्रभाव्याख्यावैभवम्" इति सार्थकनमधेयोपेतं.......

-श्री श्री सुबुधेन्द्रतीर्थाः